सा ग रि का

त्रैमासिकी

सप्तमवर्षे तृतीयाङ्कः

सागरिका-समितिः, सागर-विश्वविद्यालयः
सागरम् (म० प्र०)

सा ग रि का

त्रैमासिकी

सप्तमवर्षम्, २०२५ वि० सं०

सप्तमवर्षे तृतीयाङ्कः

सम्पादकः

प्रो० रामजी उपाध्यायः एम० ए०, डी० लिट्०

संस्कृत-विभागाध्यक्षः

प्रकाशिका
सागरिका-समितिः
सागर-विश्वविद्यालयः, सागरम् (म. प्र.)

देयम्

प्रत्यङ्कम्	२ रूपकाः
वार्षिकम्	८ रूपकाः
वस्त्रावरणसंहितवार्षिकचतुरङ्काणाम्	१० रूपकाः
आजीवनग्राहकस्य	१०० रूपकाः
अङ्कनिर्गमनम्	आषाढाश्विन – पौष – चैत्रमासेषु (जून-सितम्बर-दिसम्बर-मार्च)

चेकद्वारा सम्प्रदानार्थं देयेषु उपर्युक्तधनेषु अपरं रूप्यकमेकं संयोजनीयम्

मुद्रकः
नरहरी गोविन्द वेडेकर
सागर-विश्वविद्यालय-मुद्रणालय
सागरम् (म. प्र.)

सूचीपत्रम्

१. कुमारसम्भवे कालिदासोद्भटाचार्ययोः संवादः
डा० रेवाप्रसादो द्विवेदः १६६

२. राजशेखरवृत्तम् डा० भास्कराचार्यः त्रिपाठी २११

३. रामनारायणतर्करत्नस्य दक्षयज्ञमहाकाव्यम्
डा० रामजी उपाध्यायः २१६

४. जैनबौद्धयोः कतिपयपारिभाषिक शब्दानां
तुलनात्मक विवेचनम् हरीन्द्रभूषण जैनः २३३

५. संन्यासः कर्मयोगश्च राधावल्लभः त्रिपाठी २३६

६. रसस्य शाब्दत्वमीमांसा विश्वनाथ मिश्रः २५३

७. जोधपुर-विश्वविद्यालयीय-संस्कृतगोष्ठी २६१

८. अनुसन्धान-प्रसिद्धिः २६२

कुमारसम्भवे कालिदासोद्भटाचार्ययोः संवादः

रेवाप्रसादो द्विवेदः

अलंकारशास्त्रस्य प्रसिद्धतमे काव्यालंकारसारसंग्रहनाम्नि ग्रन्थे तत्कर्त्रा उद्भटनाम्ना[1] विदुषा कुमारसंभवनाम्नः[2] कस्यचिद् इदानीमलभ्यमानस्य स्वनिर्मितस्य काव्यस्य पंचनवतिः[3] श्लोकास्तत्तदलंकारोदाहरणत्वेनोपस्थापिताः। तेषु सतीशरीरत्यागात् प्रभृति वटुवेषधारिणा शिवेन पार्वत्यास्तपःसमाधेर्निवारणं यावत् कथा लभ्यते। कथासूत्रमिदं तत्र तथाऽनुस्यूतं तथा च अव्याहतगति विद्यते, यथा सर्वेऽमी श्लोकाः प्रारम्भमात्रहीनं कंचिदेकं संपूर्णमेव सर्गमुप-

---

१ आचार्योऽयं "विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः, तस्याभूदुद्भटो नाम भूमिभर्त्तुः सभापतिः-"इति राजतरंगिण्याः ४।४९५-पद्येन जयापीडनाम्नः कश्मीराधिपस्य समकालतया खीष्टसंवत्सरस्य ७७९ तम वर्षतः ८१३ तम वर्षं यावद् योऽवधिस्तद्राजकालत्वेन निर्धारितस्तस्मिन्नेव कदाचिद्भूदिति निश्चीयते।

२ काव्यस्यास्य कुमारसंभवमिति नाम तत्कर्तुः १५०-वर्षपश्चाद्भाविना काव्यालंकारसारसंग्रहटीकाकर्त्रा प्रतीहारेन्दुराजेन लघुविवृतिनाम्न्यामस्यां टीकायां कृतेनानेनोल्लेखेन निश्चीयते-"अनेन ग्रन्थकृता स्वोपरचितकुमारसंभवैकदेशोऽत्र उदाहरणत्वेनोपन्यस्तः-"इति का० सा० सं० १।१४ कारिकायाष्टीका। कालिदासकुमारसंभवकथावस्तुसाम्यमात्रेणेदमत्र टीकाकृतोद्भाव्यते, उत, केनचिदन्येनापि प्रमाणेनेति यद्यपि सांप्रतमलब्धतत्काव्यैरनुसंधातृभिर्वक्तुं न शक्यते, तथापि प्रामाण्यस्य स्वतस्त्ववादिभिरलब्धविरुद्धप्रमाणैरस्माभिरन्यथासंभावयितुं न शक्यत इति काव्यस्यास्य कुमारसंभवत्वमेवोररीक्रियते।

३ काव्यालंकारसारसंग्रहस्यांग्लटीकां रचितवान् प्रो० वनहट्टी श्लोकानां कदाचित् ९४ संख्याकत्वमेव मनुते।

स्थापयन्ति ।[1] एषु श्लोकेषु ये ये काव्यार्था उपस्थापितास्तेषु कालिदासकृतेः कुमारसंभवस्य भूयान् प्रभावः संवादश्छायानुहरणं वा दृश्यते संदर्भेऽस्मिंस्तानेव कतिचन श्लोकानुपस्थाप्य तदुपजीव्यभूतानपि श्लोकानुपतिष्ठापयिषामः । तत्र पूर्वं संवादभेदानेव प्रस्तवीमहि, येन तेषु तेषु स्थलेषु ते यथायथमध्यवसीयेरन् ।

संवादभेदाः

विषयममुमाश्रित्य ध्वनिप्रस्थानपरमाचार्यास्तत्रभवन्तो ध्वनिकृतः कथयन्ति–

"संवादास्तु भवन्त्येव बाहुल्येन सुमेधसाम् ।
नैकरूपतया सर्वे ते मन्तव्या विपश्चिता ।।
संवादो ह्यन्यसादृश्यं तत् पुनः प्रबिम्बवत् ।
आलेख्याकारवत् तुल्यदेहिवच्च शरीरिणाम् ।।

ध्वन्यालोककारिकाः ४।११-१३

अयमर्थो यद् ये हि सुमेधसः शोभनबुद्धयो भवन्ति ते हि बाहुल्येन संवादिनो भवन्त्येव, शोभनत्वस्य तत्त्वदर्शित्वाश्रितत्वात्, तत्त्वस्य च सत्यापरपर्यायस्य नियमेनैकरूपत्वात् । योऽयं संवादः स पुनस्त्रिविधो भवति १–प्रतिबिम्बप्रख्यः २–आलेख्यप्रख्यः ३–तुल्यदेहिप्रख्यश्चेति । एतेषां स्वरूपाणि तत्रभवता काव्यमीमांसाकृता राजशेखरेणैवमुपस्थाप्यन्ते—

१–प्रतिबिम्बकल्पम्– "अर्थः स एव सर्वो वाक्यान्तरविरचना परं यत्र ।
तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात् ।।

२–आलेख्य-कल्पम्– "कियतापि यत्र संस्कारकर्मणा वस्तु भिन्नवद् भाति ।
तत् कथितमर्थचतुरैरालेख्यप्रख्यमिति काव्यम् ।।

३–तुल्यदेहिकल्पम्– "विषयस्य यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात् ।
तत् तुल्यदेहितुल्यं काव्यं बध्नन्ति सुधियोपि ।।

का० मी० अध्याय-१२

एतेषां हेयोपादेयताविषयेपि ध्वनिकारः कथयति—

"तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम् ।
तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत् कविः ।।

ध्व० का० ४।१३

१ सर्वेपि श्लोका यद्यपि कथावस्तुघटनाक्रममनुपालयन्त एवात्रोपस्थापिता स्तथापि ८, ३३, ३५ च श्लोकोऽत्र व्युत्क्रम एव वर्त्तते । तेषु प्रथमः पंचमत्वेन, द्वितीयो द्वात्रिंशत्वेन, तृतीयश्च पंचत्रिंशत्वेन पठनीयः ।

कारिकयानया विशदीकृतान् संवादानिमान् वृत्त्याप्यसावेवं विशकलयति—

१—"तत्र पूर्वं प्रतिबिम्बकल्पं काव्यवस्तु परिहर्त्तव्यं सुमतिना, यतः तद् अनन्यात्म तात्त्विक-शरीरशून्यम्

२—तदनन्तरम् आलेख्यप्रख्यम् अन्यसाम्यं शरीरान्तरयुक्तमपि तुच्छात्मत्वेन त्यक्तव्यम् ।

३—तृतीयं तु विभिन्न-कमनीय-शरीर-सद्भावे सति ससंवादमपि काव्यवस्तु न त्यक्तव्यं कविना, न हि शरीरी शरीरिणान्येन सदृशोऽप्येक एवेति शक्यते वक्तुम् । "इति ।

वृत्त्यानयोपस्थापितमर्थं कारिकयाप्यनया स्वयं ध्वनिकृदेवैवमुपपादयति—

"आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि ।
वस्तु भातितरां तन्व्या शशिच्छायमिवाननम् ॥ ध्व० ४।१४

संवादा इमे ध्वनिकृता वाक्यार्थ–पदार्थरूपत्वेन द्विधा विभज्यन्ते । तेषु य इमे पूर्वमुक्ता एते वाक्यार्थरूपाः । पदार्थरूपाणां संवादानां भेदाननुपस्थाप्य तदर्थं हेयोपादेयताविषयकं मतमेवासावेवमुपस्थायति—

"अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी ।
नूतने स्फुरति काव्यवस्तुनि व्यक्तमेव खलु सा न दुष्यति ॥
ध्व० ४।१५

यदपि तदपि रम्यं यत्र लोकस्य किंचित्
स्फुरितमिदमितीयं बुद्धिरभ्युज्जिहीते ।
अनुगतमपि पूर्वच्छायया वस्तु तादृक्
सुकविरुपनिबध्नन्निन्द्यतां नोपयाति ॥ ध्व० ४।१६

प्रतायन्तां वाचो निमित्तविविधार्थामृतरसा
न सादः कर्तव्यः कविभिरनवद्ये स्वविषये ।
परस्वादानेच्छाविरतमनसो वस्तु सुकवेः
सरस्वत्येवैषा घटयति यथेष्टं भगवती ॥ ध्व० ४।१७

सेयं संवादगाथा इमामुपस्थाप्य सांप्रतं कुमारसंभवयोः संवादिनः श्लोकानुपस्थापयामः, तेषु कुत्र कीदृशः संवाद इति सुमतिभिः स्वयमेवावधेयम् ।

भावसंवादः

उद्भटः पार्वत्यास्तपःसमाधिकालिकीं शरीरस्थितिं वर्णयंल्लिखति—

१- 'पद्मं च निशि निश्श्रीकं दिवा चन्द्रं च निष्प्रभम् ।
स्फुरच्छायेन सततं मुखेनाधः प्रकुर्वतीम् ॥
उदा० संख्या ३९

पद्यस्यास्य पदार्थाः वाक्यार्थाश्चेति द्वितयेऽपि कालिदासस्य --

'चन्द्रं गता पद्मगुणान् न भुंक्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिवाप लक्ष्मीः ॥
कुमारसं० १।४३

पद्यस्य द्वितयानपि तान् प्रतिबिम्बवर्त्मनैव दूरमनुहरन्ति ।

उद्भटः पार्वत्यास्तपसः कठोरतामुपप्रस्तुवन् ब्रूते—

२- 'शीर्ण-पर्णाम्बु-वाताशकष्टेऽपि तपसि स्थिताम् ।
समुद्वहन्तीं नापूर्वं गर्वमन्यतपस्विवत्' ॥ उ० सं० ४०

वक्तव्यमिदं कालिदासस्य—

'स्वयं-विशीर्ण-द्रुम-पर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः ॥
कुमारसं० ५।२८

मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमंगं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ॥
कुमारसं० ५।२९

इत्यनयोः पद्यार्थयोः संक्षेपतो नातिरिच्यते ।

कालिदासः पार्वतीकौमारवर्णने स्मितद्युतिं चित्रयंल्लिखति—

'पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद् विशदस्य तस्य ताम्रौष्ठ-पर्यस्त-रुचः स्मितस्य ॥
कुमा० १।४४

किन्तु, इमामेव पुष्पप्रवालच्छटां मुक्ता-विद्रुमकान्तिं वा स पार्वत्याः करे स्थितायाः स्फटिकाक्षमालाया वर्णनावसरे विस्मरति । तत्र परभागमिममपहायासौ ब्रवीति—

'अथाग्रहस्ते मुकुलीकृतांगुलौ समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथंचिदद्रेस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत— ॥
कुमा० ५।६३

उद्भटः परभागसौभगमिदमाकलयति, चित्रयति च—

'पतेद् यदि शशिद्योतच्छटा पद्मे विकासिनि ।
मुक्ताफलाक्षमालायाः करेऽस्याः स्यात् तदोपमा ॥ उ०सं० ४६

अनुहरणमिदं तुल्यदेहितया स्थितमिति, यत्सत्यं, नितान्तमेव श्लाघास्पदम् ।

४- पार्वत्याः पंचाग्नितपः कालिदास एवं वर्णयति—

'शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ।।
कुमा० ५।२०

तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।
अपांगयोः केवलस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम् ।।
कुमा० ५।२१

उद्भटः कालिदासाभिव्यंजितं सौभगमिदं किंचिद् विकृत्यैवं प्रस्तवीति—

'अस्याः सदार्कबिम्बस्थ-दृष्टि-पीनातपैर्जपैः ।
श्यामिकाङ्केन पतितं मुखे चन्द्रभ्रमादिव ।। उ०सं० ४६

सूर्यप्रभया मुखादिकं श्यामिमानमाभजतीति नास्ति मिथ्या, किन्तु सौन्दर्यप्रस्तावे कमलश्रीकत्वमेव तत्राधिकं हृद्यम् उत तादृशं श्यामत्वमिति सुधीभिः स्वयमेवावसेयम् ।

५- कालिदासस्य पार्वती मृगानरण्यबीजांजलिभिस्तथाश्वासयति यथा ते तेषां नेत्रैः सहात्मनो नेत्रयोर्मानेऽपि पार्वतीं प्रति न शंकन्ते । यदुच्यते—

'अरण्यबीजांजलि-दान-लालितास्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनाममिमीत लोचने ।।
कुमा०५।१५

वरतन्तुतपोवने मृगपोतका मुनिक्रोडेषु नाभिनालं च्यावयन्ति-(रघुवंशस्य-५।७), कण्वाश्रमे च दीर्घापांगो नाम मृगपोतकः शकुन्तलायाः पुत्रकृतको विद्यते-(शाकुन्तले ४।१४) । तामेतां निखिलामपि भावधारामुद्भट एवं संक्षिपति—

'इयं च सुतवाल्लभ्यान्निर्विशेषस्पृहावती ।[1]
उल्लापयितुमारब्धा कृत्वेमं क्रोड आत्मनः ।। उ०सं० ५२

६- कालिदासः पार्वत्याः कोमलेन वपुषा क्रियमाणस्य क्रूरस्य तपसो विषमतां शिरीषपुष्प-पतत्रि-पदाहतिसखीं मन्वानः कवयति...

'मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ।।
कुमा० ५।४

तामिमां विषमतामुद्भटोपि अपह्नुतिचमत्कारेणैवमुपस्थापयति—

'एतद्धि न तपः सत्यमिदं हालाहलं विषम् ।
विशेषतः शशिकलाकोमलानां भवादृशाम् ।। (उ०सं०६९)-इति ।

---

१ श्लोकोयम् 'इयं च सुतवाल्लभ्यनिर्विशेषं स्पृहावती'-त्येवं किंचिद् भवेत् ।

७- विषमामिमां स्थितिं दृष्ट्वा कालिदासस्य वटुवेषः शिवः पार्वतीं किंचित् प्रष्टुमुपपन्नचापलो भवति, ब्रवीति च—

'प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ।
यतः सतां सन्नतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते ॥
कुमार० ५।३९

अतोऽत्र किंचिद् भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने ! न चेद् रहस्यं प्रतिवक्तुमर्हसि ॥

उद्भटस्यापि वटुविषमतयानया दूनचित्तो भवति, आक्षेपविच्छित्त्याच प्रष्टुमुपक्रमते—

'इत्थं विसंस्थुलं दृष्ट्वा तावकीनं विचेष्टितम् ।
नोदेति किमपि प्रष्टुं सत्वरस्यापि मे मनः ॥ उ०सं० ७१ ॥

८- कालिदासस्य वटुः पार्वतीं तपःकारणं पृच्छन् वक्ति—

'कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात् किमतः परं वद ॥
कुमा० ५।४१

उद्भटो विस्मयोक्तिमिमां विशेषोक्तिरूपेणैवं परिणमयति—

महर्द्धिनि कुले जन्म रूपं स्मरसुहृद् वयः ।
तथापि न सुखप्राप्तिः कस्य चित्रीयते न धीः ॥ उ० सं० ७०

९- पार्वत्याः सौकुमार्यं चित्रयता कालिदासेनालेखि—

क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः कांचनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ॥
कुमार ५।१९

महार्ह-शय्या-परिवर्तन-च्युतैः स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले ॥
कुमा० ५।१२

उद्भट इदमेव तथ्यमेवमतितमां सुकुमारेण क्रमेण चित्रयति—

'त्वदंगमार्दवं दृष्ट्वा कस्य चित्ते न भासते ।
मालती-शशभृल्लेखा-कदलीनां कठोरता ॥ उ०सं०७२

१०- पार्वत्याः कायकान्तिः मुनिवेषश्चेति द्वयं नितान्तमेव विसदृशमिति कालिदास उद्भटश्चेति द्वावपि समानेनैवाध्वना स्फोरयतः । तत्र कालिदासो यथा—

'किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ॥
कुमा० ५।४४

उद्‌भटश्च यथा--

'योगपट्टो जटाजालं तारवी त्वङ्‌मृगाजिनम् ।
उचितानि तवांगस्य यद्यमूनि तदुच्यताम् ॥ उ०सं० ७४
छायेयं तव शेषांगकान्तेः किंचिदनुज्ज्वला ।
विभूषाघटनादेशान् दर्शयन्ती दुनोति माम् ॥ उ०सं० ६४

११- कालिदासोऽर्थान्तरन्यानविच्छित्तिमाश्रित्य चारुतायाः फलं प्रियवाल्लभ्यरूपं प्रियसौभाग्यमेवं तनुते--

'तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ॥
कुमा० ५।१

आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः ॥
कुमा० ७।२२

उद्‌भटः कालिदासस्यान्वयं व्यतिरेकयति निदर्शनामुखेन[1] च ब्रवीति —

विनोचितेन पत्या च रूपवत्यपि कामिनी ।
विधुवन्ध्यविभावर्याः प्रविभर्त्ति विशोभताम् ॥ उ० सं० ७७

१२–कालिदासवटोर्दृष्टौ वरप्राप्तये तपःसमाधिः पार्वतीसदृक्षाभ्यो रूपवतीभ्योऽनङ्गनाललाम भूताभ्यः कुमारीभ्यः तथैव विप्रतीपो यथा रत्नद्वारा स्वग्राहकस्यान्वेषः, यदुक्तम्—

दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते तु तत् ॥
कुमा० ५।४५

उद्भटब्रह्मचार्यपि क्रममिमं तामेव दिशमनुसरन्नेवं किंचिदधिकं कठोरतया समर्थयति—

———————

१ उद्भटो निदर्शनार्थं विदर्शनापदं प्रयुङ्क्ते । लिपिदोषोऽत्र मूलमिति सहसा वक्तुं न शक्यते, संस्करणान्तरेष्वपि तथैव दर्शनात् ।

इत्थं स्थितिर्वैरार्था चेन्मा कृथा व्यर्थमर्थिताम् ।
रूपेण ते युवा सर्वः पादलग्नो हि किंकरः ।।

उ० सं० ७९

अत्र "पादबद्धो हि नूपुर" इति चेत् स्यात् ?

१३—कालिदासः पार्वतीं सखीमुखेन ब्रह्मचारिणे परिचाययन् लिखति—

इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति ।।

कुमार० ५।५३

अभिलापस्यास्य परिणाममपि चित्रयंल्लिखति—

तदाप्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि ।।

कुमा० ५।५५

उद्भटो द्वितयमपीदं पद्येनानेनैवं संकलयति—

हरेणेव स्मरव्याधस्त्वयानंगीकृतोऽपि सन् ।
त्वद्वपुः क्षणमप्येष धार्ष्ट्यादिव न मुंचति ।। उ० सं० ८१

स्थलेष्वेषु भावसंवादः कुमारसंभवद्वये स्फुटं स्फुटः । अन्येष्वपि स्थलेषु काव्ययोरनयोरसौ न न लब्धुं शक्यते ।

प्रबन्धसंवादः

भाव इव प्रबन्धेऽपि काव्ययोरनयोः संवादो विहितपदः । तदर्थमपि कानिचन निदर्शनानि प्रस्तूयन्ते—

१—सप्तर्षिमण्डलमुखविहित-पार्वती-याचन-प्रस्तावं भगवन्तं शंकरं कालिदासः षष्ठसर्गान्ते-पार्वती समागमोत्सुकं— संक्षेपेण वर्णयति ।

पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः ।।

कुमा० ६।९५

उद्भटः पुनर्भगवत उत्कतामिमां समासतो व्यासभूमिमापादयन्नैकानि पद्यानि प्रस्तौति । तथाहि—

इति भावयतस्तस्य समस्तान् पार्वतीगुणान ।
संभृतानल्पसंकल्पः कन्दर्पः प्रबलोऽभवत् ।।
स्विद्यतापि च गात्रेण बभार पुलकोत्करम् ।
कदम्बकलिकाकोषकेसरप्रकरोपगम् ।।

क्षणमौत्सुक्यगर्भिण्या चिन्तानिश्चलया क्षणम् ।
क्षणं प्रमोदालसया दृशास्यास्यमभूष्यत ।।
तथा कामोऽस्य ववृधे यथा हिमगिरेः सुताम् ।
संग्रहीतुं प्रववृते हठेनापास्य सत्पथम् ।।

उ० सं० ५३-५६

उद्भटोत्र भगवन्तं शंकरमपि लोकसामान्यस्थितिकमेव चित्रयति । कालिदासः पुनर्विकारमापन्नमपि भगवन्तं भगवत्त्वभूमिकातः स्खलयितुं विचिकित्सते । अत एवासौ तं पशुपतिरिति, विभुरिति च संज्ञापयते ।

२—कालिदासो गिरिराजस्य हिमाचलस्य विभूतिं कुमारसंभवस्य प्रथमे षष्ठे च सर्गे महता सन्नाहेन चित्रयति । उद्भटोपि ताम् उदात्तालंकारद्वैत-निदर्शनतया नातिप्रबन्धनीयमपि निम्नलिखितेन क्रमेण प्रबध्नाति—

उवाच च यतः क्रोडे वेणुकुंजरजन्मभिः ।
मुक्ताफलैरलंकारः शबरीणामपीच्छया ।।
पुष्ट्येन्द्रनील - वैदूर्य - पद्मरागमयैर्वियत् ।
शिरोभिरुल्लिखद् यत्र शिखरं गन्धमादनम् ।।
उत्तरोपत्यका यस्य प्रधानस्वर्णभूमयः ।
महान् मरकतोर्वीध्रः पादोपान्तं च संश्रितः ।।
वभूव यस्य पातालपातिन्यां संक्षये क्षितौ ।
पतनं न तया सार्धमायामस्तु प्रकट्यभूत् ।।
तस्यादिक्रोडपीनांसनिघर्षेऽपि पुनः पुनः ।
निष्कम्पस्स स्थितवतो हिमाद्रेर्भवती सुता ।। उ०सं० ६१–६५

अत्रापि भावसाम्यं लक्ष्यत एव ।

३—कालिदासः प्रबन्धे संवृतिवक्रतामाश्रित्य सामाजिकजनकौतूहलरक्षणं यत्नेन चिकीर्षति । उद्भटः पुनः कुतूहलमवीक्ष्य विवृततयैव कृत्स्नमपि भावि घटनाजातं पूर्वमेवोपस्थापयति । उदाहरणार्थं, कालिदासः भगवतः शंकरस्य तपश्चर्यां वर्णयन् ब्रूते—

तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्तिः ।
स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार ।।

कुमार० १।५७

यो हि स्वयमेव तपसः फलानां विधाता सोपि केनापि कामेन तपश्चरतीति कथिते, 'कोन्वस्य कामः' इति बलादेवोन्मिपतितमामन्तःकरणे कुतूहलिता सचेतसाम् । कालिदासः कुतूहलमिदं न न शमयति । किन्त्वसौ तदर्थं व्याज-

माश्रयति, अर्थापत्त्या च प्रवर्त्तते । भगवत्तपोभूमिकामारचयन्नसौ तत्कामना-विषयीभूतमर्थमुपक्षिपति, कथयति च—

यदैव पूर्वे जनने शरीरं सा दक्षरोषात् सुदती ससर्ज ।
तदाप्रभृत्येव विमुक्तसंगः पतिः पशूनामपरिग्रहोऽभूत् ॥

कुमा० १।५३

भगवत्यप्येकोऽभावोऽवर्त्तत । स च परिग्रहरूपस्य कलत्रस्य । यस्याभावो भवति तदर्थमेव कामनोदेति । ततश्च स्पष्टमेव यत् को नाम स कामो यदर्थं कामारिरपि तपश्चरति, महाकविश्च यं "केना" पीति किंपदेन संवृणोति । उद्भटः पुनर्गोपनीयतामिमां भनक्ति । स ह्यपरिग्रहस्य भगवतः कामनामिमां महता प्रपंचेन—

तां शशिच्छायवदनां नीलोत्पलदलेक्षणाम् ।
सरोजकर्णिकागौरीं गौरीं प्रति मनो दधौ ॥ [उ० सं० ३६]

इत आरभ्य,

हरोऽयं ध्यानमातस्थौ संस्थाप्यात्मानमात्मना ।
विसंवदेद्धि प्रत्यक्षं निर्ध्यातं ध्यानतो न तु ॥ [उ० सं० ३६]

इति यावदुपग्रथ्नाति ।

४—कालिदासः पंचमे सर्गे भगवन्तं पार्वतीतपोवनं प्रवेशयति, किन्तु वटु-वेषेणापरिचिततया । अस्ति तस्य श्लोकः—

'अथाजिनाषाढधरः प्रगल्भवाग् ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ॥

कुमार० ५।३०

अत्रापि 'किं-पदेनैव भाविनमर्थं कालिदासो गोपायति । इतः परम्—

इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥

कुमार० ५।८४

इति पद्यं यावत् ५४-पद्यव्यापि कथानकं स तथैव संवृतिलीलयैव संग्रथ्नन् तिष्ठति । यदा च तदन्ते भगवन्तमसौ सहसा प्रकटयति तदा प्रबन्धशरीरबन्धे जीवातवः सुप्तोत्थितत्वेनेवाहिता दृश्यन्ते । उद्भटः पुनः प्रबन्धस्य चक्रतामिमां कदाचित् परिचिनोत्येव नहि । स हि प्रथमत एव भगवन्तं पार्वतीतपोवनं प्रविशन्तं प्रतिपादयति, कथयति च—

'स गौरीशिखरं गत्वा ददर्शोमां तपःकृशाम् ।
राहुपीतप्रभस्येन्दोर्जयन्तीं दूरतस्तनुम् ॥ उदा०संख्या ३८

भगवान् शंकरो वटुवेषमेव कथमंगीचकारेति प्रश्नेऽप्युद्भट उत्तरति—

प्रच्छन्ना शस्यते वृत्तिः स्त्रीणां भावपरीक्षणे ।
प्रतस्थे धूर्जटिरतस्तनुं स्वीकृत्य वाटवीम् ।। उदा०सं०३५ ।।

एतदेव चार्थान्तरन्यासेनापि द्रढयन्नसौ लिखति—

'तन्नास्ति यन्न कुरुते लोको ह्यत्यन्तकार्थिकः ।
एष शर्वोऽपि भगवान् वटूभूय स्म वर्त्तते ।। उदा०सं०३४ ।।

एतेन हि रहस्योद्घाटनेन प्रबन्धस्य प्राणभूतमौत्सुक्यतत्त्वमपहस्तितं भवति ।

५- कालिदासो वसन्तविभूतिं संयमारातितया प्रस्तुवन् कुमारसंभवस्य तृतीयं सर्गं भगवतः शंकरस्य समाधिभंगाय निर्माति । उद्भटोपि तस्य भगवतः समाधिभंगायैव प्रक्रमते, किन्तु स वसन्तं विहाय शरदमुपादत्ते । द्वादशभिः पद्यरत्नैश्च तां चित्रयति । छेकादीननुप्रसान् रूपकं चासौ तत्र विच्छित्तिजनकतया योजयति । तत्र यद्यपि—

'ज्योत्स्नाम्बुनेन्दु-कुम्भेन ताराकुसुम-शारितम् ।
क्रमशो रात्रिकन्याभिर्व्योमोद्यानमसिच्यत ।।
उत्पतद्भिः पतद्भिश्च पिच्छाली-वाल-शालिभिः ।
राजहंसैरवीज्यन्त शरदैव सरोनृपाः ।।
वनान्तदेवतावेण्यः पान्थस्त्री-कालश्रृंखलाः ।
मार-प्रवीरासिलता भृंगमालाश्चकासिरे ।।उदा०सं०११-१४

इत्येवं कवित्वमवश्यमेव श्लाघास्पदमस्ति तथापि भाद्रपदे जायमानाया हरतालिका-तृतीयाः शरत्पूर्वभावित्वात् तस्या एव च शिवोपगमतिथित्वेन प्रसिद्धत्वात् समयानौचित्यमत्र दुष्परिहरं जायते । कालिदासोपि यद्यपि वसन्तप्रवृत्तिमा-कालिकीमेव

'तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ।
प्रयत्नसंस्तम्भितविक्रियाणां कथंचिदीशा मनसां बभूवुः ।।
कुमा० ३।३४ ।।

इत्येवं प्रतिपादयति तथापि शिवपार्वतीपरस्परपरिग्रहवृत्तान्तस्य तद्व्यवहितो-त्तरत्वेनाप्रतिपादनादनौचित्यमिदं तत्र न प्रसज्यते । उद्भटवर्णन एतदपि नितान्तमेव कविसमयविरुद्धं यदसौ शरत्कालिकमपि बलाहकं धारासारिणं चित्रयति—

'आसारधाराविशिखैर्नभोभागप्रभासिभिः ।
प्रसाध्यते स्म धवलैराशाराज्यं बलाहकैः ।। उदा०सं०१५ ।

बलाहकानां धवलत्वेन वार्षिकत्वं परिह्लियते, ततश्च संदर्भस्यास्य मुक्तप्रायतापि ।

यद्यपि शरद्यपि मेघा धवलतामादधाना अपि वर्षन्त्येव यदा कदा, तथापि तदानीं तद्वर्षासु भारतीया कविप्रतिभा सौभगं न पश्यति, कमलप्रभृतीनां, हंसादीनां, ज्योत्स्नाप्रमुखाणामेव हि तत्पात्रतया तदानीमत्रोपादीयमानत्वात्। उपादीयन्ते चापि भट्टोद्भटेन उदभटेनापि। यथा चैतत् तदद्योदत्तैस्तस्यैव पद्यरत्नैरवसातुं शक्यम्—

'तत्र तोयाशयाशेषव्याकोशितकुशेशया।
चकाशे शालिकिंशारुकपिशाशामुखी शरत् ॥ उदा०सं० ३॥
'सान्द्रारविन्दवृन्दोत्थ-मकरन्दाम्बुबिन्दुभिः।
स्यन्दिभिः सुन्दरस्यन्दं नन्दितेन्दिन्दिरा क्वचित् ॥ ४॥
पद्मिनीं पद्मिनीगाढस्पृहयागत्य मानसात्।
अन्तर्दन्तुरयामासुर्हंसा हंसकुलालयात् ॥ उदा०सं० १०॥

ज्योत्स्नावर्णनं पूर्वोद्धृतेन 'ज्योत्स्नाम्बुने-'त्यादिना पद्येन प्राप्तप्रायमेव। पद्यान्तरेणाप्यधोदत्तेन तत्र कविसंरम्भो द्रष्टुं शक्यते—

'क्षणं कामज्वरोत्थित्यै भूयः संतापवृद्धये।
वियोगिनामभूच्चान्द्री चन्द्रिका चन्दनं यथा ॥ उदा०सं०१८॥

तदित्थं शारदेपि मेघे धारासारवर्णनं यथार्थमपि कविसमयप्रतीपमिति नाधिकं रम्यम्। ततश्च प्रबन्धे यादृशमवधानं कालिदासे दृश्यते तं दूरमनुहरत्यप्युद्भटे तत् तादृशं न दृश्यते।

सर्वथा महान्ताविमौ कविकर्मनिष्णातौ कवी। अनयोः परावरत्वदर्शनं हि महिमाचार्यदृशा पौरोभाग्यमात्रम् अभाग्याभाजन-जनासेव्यम्।[1] लेखेनानेनैतदेव केवलं प्रस्तूयते यत् कुमारसंभवस्य कथावस्तु कुमारसंभवनाम्नैव, कुमारसंभवविच्छित्त्यैव काव्यालंकारसारसंग्रहकर्त्रा श्रीमता उद्भटाचार्येणापि महता संरम्भेण स्वकविकर्मपात्रीकृतम्, आदृतश्च ततः श्रीमान् महाकवीन्द्रः कालिदासः।

---

१ व्यक्तिविवेके द्वितीयविमर्शारम्भः।

राजशेखरवृत्तम्

डा० भास्कराचार्यः त्रिपाठी

क्षितिक्षितो विस्मृतिगह्वरं गता
विशीर्य सौधाः क्षितिगह्वरं गताः ।
गताश्च सर्वे न परन्तु सा गता
कवेः स्थिरा सत्त्वमयी सरस्वती ।।[1]

अन्यसंस्कृतकवीनामपेक्षया विपुलतरो निजपरिचयः प्रत्तो राजशेखरेण, किन्तु सहस्राब्दीव्यत्यये नासौ पर्याप्ततरो सुखाववोधाय सञ्जायते । कियन्तिचित् स्युरेवं तथ्यानि ।

समयः

अथ आश्रयदातारो नृपाः कविना नामग्राहमुल्लिखिताः १– महोदय- (कन्नौज) नरेशो रघुवंशी निर्भयोपाह्वो महेन्द्रपालः २– तत्सूनुर्महीपालः ३– चेदिराजः कलचुरिवंशी श्रीयुवराजदेवश्च । महेन्द्रपालस्य विज्ञाततिथयः ८९३ खिस्ताब्दतः ९०७ महीपालस्य च ९१४ वर्षतः ९२४ खिष्ताब्दं यावत् सन्ति ।[2] श्रीयुवराज देवः ९३५ खिस्ताब्दकाले व्यराजत ।[3] सर्वप्रथमं प्रथम- योरनयोः जे. एफ्. फ्लीट् विदुषा चरमस्य च डा० हुल्त्जसूरिणा प्रत्यभिज्ञानं विज्ञापितम् । आरभ्य ततोऽनेकशः मिराशीप्रभृतिमनीषिभिः विशदितोऽयं विषयः ।[4] साहित्यिकोल्लेखा अपि कवेरेनमेव समयं समर्थयन्ति । नवमशताब्दी-

---

१ स्वरचितसत्त्वमयीसरस्वती कवितायाः (११) सुरभारती १९६२-६३, प्रयाग वि० विद्यालयः

२ राज्यकालश्च क्रमशः ८८५–९१०, ९१२–९४२ खिस्ताब्दाः मन्यते ।
History of Kanauj, Dr. R. S. Tripathi

३ The Chronological Order of Rājaśekharaś Works. V.V. Mirashi
Studies in Indology, P. 60.

४ Indian Antiquary, Vol. 16, 34, 62.

सम्भवा उद्भटानन्दवर्द्धनादयः समिङ्क्ता राजशेखरेण स्वयमिङ्क्तिश्च स कुन्तकाभिनवसोमदेवधनपालसोड्ढलप्रष्ठैः दशमशताब्द्युत्तरार्द्धजैः विद्वत्कदम्बकैः।

युवराजदेवपौत्रस्य द्वितीययुवराजदेवस्य ६७५ खिस्ताब्दलिखिते बिल्हरी-प्रस्तराभिलेखे सुश्लिष्टबन्धविस्मित इव राजशेखरोऽपि वर्णित इति ८८५ वर्षतः ९७५ खिस्ताब्दव्यापिनं तदीयजीवनानेहसं निष्कर्षन्ति मिराशीमहोदयाः– 'यदि बालकवी राजशेखरः प्रथमाश्रयदातुः महेन्द्रपालस्य राजपरिषदं (९०० खिस्ताब्दपार्श्वतः) पञ्चादशवर्षीयोऽभ्यगात्, तर्हिबिल्हरीलेखकाले नवतिवर्षावस्थोऽसौ स्यात्। ईदृगेव दीर्घायुः तदुर्वरकाव्यकृतिभिरपि प्रमीयेत।'[1] अत्र वक्तव्यं यदनुमानितोऽयं समयः पूर्वसीम्नि कतिपयहायनैर्विस्तारणीयः, यतो महेन्द्रपालस्य ९१२ खिस्ताब्दावमेये राज्यकाल एव कथं पञ्चविंशतिवर्षदेश्यौ राजशेखरः राजगुरुः उपाध्यायः षट्प्रबन्धप्रणयनधुरीणो[2] वा सम्भवेत्। अतः कविराजोऽयं ८८० खिस्ताब्दपार्श्वतोऽवाप्तजनिः प्रायः शतायुः सौभाग्यभागभवत्। एतदपि कथ्येत यन्मिराशी-महोदयः कवेर्जनकं चेदिराजमन्त्रिणं मनुते[3], तत एव चेदिजातस्य राजशेखरस्य स्वतः कान्यकुब्जागमनं प्रतिपादयति। वस्तुतोऽसौ कान्यकुब्जपरिषदि महामन्त्रिपदमलञ्चकार अत्रैव च सञ्जातो राजशेखर इति सविस्तरमधोविवेचितम्।

पूर्वजाः

'स मूर्त्तो यत्रासीद् गुणगण इवाकालजलदः
सुरानन्दः सोऽपि श्रवणपुटपेयेन वचसा।
न चान्ये गण्यन्ते तरलकविराजप्रभृतयो
महाभागस्तस्मिन्नयमजनि यायावरकुले॥

बालरामायणम् १.१२

तदामुष्यायणस्य महाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दौर्दुकिः शीलवतीसूनुरुपाध्यायः श्रीराजशेखरः। वा. रा. पृ. ८–९

———————

१ Mahākōsala Historical Society papers, Vol. I, P, 17–18.
Studies in Indology– P. 60 (Originally in 1934 A. D.)
Corpus Inscriptionum Indicarum, Vol. IV. 1955, P. 208
अत्र पूर्वसीमानकुञ्चय पञ्चाशीतिवर्षायुः कविः सम्भावितः।

२ बालरामायणम् पण्डितसंस्करणम् १.१५, पृ० ९
तथा 'विद्धि नः षट्प्रबन्धान्' तदेव १.१२।

३ Corpus Inscriptionum Indicarum, Vol. IV, P. CLXXV

परिचयेऽस्मिन् कवेः प्रपितामहोऽकालजलदः—'महाराष्ट्रचूडामणिः' कथितः। महाराष्ट्रस्य विदर्भविषयः तत्रत्यं वत्सगुल्मनगरञ्च कविना सपक्षपातं पुनः पुनरङ्कितेस्तः इति मिराशीमहानुभावः समुचितमेव सम्भावयति वत्सगुल्मं (आधुनिकमहाराष्ट्रस्य अकोलामण्डलान्तःपातिवाशीमस्थानम्) कवेः पूर्वजावासम्। कविप्रतिभोऽकालजलदः समभूत्। तदभिधानमपि दीपशिखाकालिदास इव भवभूतिरिव वोपाहितमाभाति। सूक्तिमुक्तावल्यां (पृ० ४८६) शार्ङ्गधरपद्धतौ (७७७) सुभाषितावल्यां (८४३) भोजप्रबन्धे (विद्याभवन-संस्कृत-ग्रन्थमाला २१, पृ० ६१) चाद समुल्लेखो विलोक्यते। मिराशीविदुषोनुसारतः चेदिनरेशप्रथमकोक्कलस्य (८५०-८९० खिस्ताब्दाः) सभाकविरकालजलदआसीत्।[1] सम्भावनेयं चेदिसमभिनीताया राजशेखरीय–विद्धशालभञ्जिकायाः प्रस्तावनया परिपुष्यतेतराम्[2]। सुरानन्दः कवेः पितामह स्यात्[3]। काव्यमीमांसायामेकस्थले (दलालसंस्करणम् पृ० ७५) सुरानन्दस्यापि मतं वर्ततेऽङ्कितम्। फ्लीटमहोदयो ह्येनं सूक्तिमुक्तावलिवर्तिन्याः–

नदीनां मेकलसुता नृपाणां रणविग्रहः।
कवीनाञ्च सुरानन्दश्चेदिमण्डलमण्डनम्॥

इति राजशेखरोक्तेः रणविग्रहोपाह्वस्य चेदिभूभृतो द्वितीयशङ्करगणस्य (८९०-९१० खिस्ताब्दाः) सभासदमाह।[4]

जननी कविराजस्य शीलवती पिता च दुर्दुको दुहिको[5] वेति बहुत्र कृतिषु चर्चितमस्ति। दुर्दुको महोदयराजस्य महामन्त्री समभूदिति मदीयं सम्मतम्। अवधेयं यत्कान्यकुब्जेऽभिनीतयोः बालरामायणबालभारतयोरेव प्रस्तावनायां

———————

१ Corpus Inscriptionum Indicarum P. CLXXIV. and A Practical Eng. Sans. Dictionary Vol. III, preface P. 137-138 by– Ananduran Borooah

२ '(आकाशे सखे सोमदत्त! किमात्थ तदकालजलदस्य प्रणप्तुस्तस्य गुणगणाः किमित न वर्ण्यन्ते।' विद्धशालभञ्जिका पृ० ८

३ 'न चान्ये गण्यन्ते' इत्युपेक्षयाऽऽकलिताः तरलकविराजादयः सगर्भ्याः न स्युः 'यायावरकुलश्रेणेर्मुक्तायष्टेश्च मण्डनम्। सुवर्णबन्धरुचिरस्तरलो यथा।' इति सूक्तिमुक्तावलिवर्तिन्या राजशेखरोक्तेरपि साधीयान् निष्कर्षो घोषमहाशयेनाकृष्टः यद् यायावरकुलश्रेणेः तात्पर्यं तदीयवंशशाखाभिसम्बद्धमस्ति।

४ Gazetteer of the Bombay Presidency, Vol. I, part II, P. 414

५ विद्धशालभञ्जिका पृ० ७

राजशेखरो महामन्त्रिपुत्रो महासुमन्त्रिपुत्रश्च कथितः चेदिदेशे त्रिपुर्यामभिनीय-मानयोः कर्पूरमञ्जरी विद्धशालभञ्जिकयोरेतादृशो नोल्लेखः लभ्यते ।[1] महीपा-लराज्यकाले दुर्दुकः समं राजशेखरेण महोदयं विहाय चेदिराजधानीं प्राप। एतादृशो देशत्यागो भूपेतराश्रयणश्च किञ्चिन्महत्त्वपूर्णमपेक्षाते कारणम् । अथ महीपालस्य द्वितीयराजकविः क्षेमीश्वरः चण्डकौशिकनाटके समनन्तरमेव नाम्ना कश्चित् कूटनीतिकारिणं दुष्टामात्यं वर्णयति ।[2] अत्र सम्भवतो महीपालं प्रतिदुर्दुकस्यैव मनोमालिन्यं विवक्षितम् । पूर्वजाध्युषिता त्रिपुरी दुर्दुकराजशेखर-योरभीष्टाऽभूदेव, यतोऽमू पूर्वतः प्रशंसन्तौ (बालरामायणम् ३।३८–४०, बाल-भारतम् १।६५) पश्चात्तामेवाध्यूषतुः । महीपालश्च महोदयाधिपः सहजविमना-श्चेदीशान् प्रत्यासीत्, यतो द्वितीयभोजं प्रतिद्वन्द्विनं कान्यकुब्जराजपीठे कलचुरि-नृपः कोक्कलदेवो निवेशितवानासीत् । प्रथमयुवराजदेवस्य सम्बन्धिनौ राष्ट्रकूटेशतृतीयेन्द्रः तृतीयकृष्णश्च महीपालराज्यं द्विराक्रामतः स्म ।[3] अतएव बालभारतस्य प्रस्तावनायां महीपालः चेदिपतिकृते हस्तिज्वरसदृशो निर्दिष्टः। मिराशी-महोदयैः प्रथमयुवराजदेवद्वारा महीपालपराजयः सम्भावितः । वस्तुतः तथ्यैरैतिहासिकैरेवं प्रतीयते--यदा ९३८ ख्रिस्ताब्दपार्श्वतः तृतीयकृष्णो महीपा-लाधिकृतं कालंजरदुर्गं जिगाय तदैव महीपालो राष्ट्रकूटकलचुरिभ्यां दुरभिसन्धि-शङ्कया दुर्दुकमभ्ययुङ्क्त स च समं राजशेखरेण त्रिपुरीमैत् । काव्यमीमांसायां विशिष्टकविप्रशंसासु च राजशेखरेणानुल्लिखितः क्षेमीश्वरः तदनन्तरमेव संभवतो महीपालाश्रयमवाप चकार च गर्हणां भूतपूर्वमहामन्त्रिणः ।

———————

१ कर्पूरमञ्जरी मिराशीविदुषोऽनुसारं कान्यकुब्जेऽभिनीता, किन्तु मत्समीक्षासु तस्याः चेदिदेशाभिनीतत्वमापततीति सागरिकाया एवान्यतरासु भविष्यत्सञ्चिकासु 'कृतित्वं राजशेखरस्य' इति शीर्षकलेखे विशदीकरिष्यते । महोदयतः प्रवासविद्रवे शकलीभूतबालभारतकाव्यमीमांसे च कान्यकुब्ज एव रचिते इत्यपि तत्रैव भविता निर्दशितम् ।

२ 'आदिष्टोऽस्मि दुष्टामात्यबुद्धिवागुराऽलङ्घ्यसिंहरंहसा ... श्रीमहीपालदेवेन
चण्डकौशिकप्रस्तावना

३ History of Kanauj—R. S. Tripathi P. 255-256. and The Age of Imperial Kanauj P. 13, 34-35, 88.

व्यक्तित्वम्—

राजशेखरमाप्टेमहोदयो दाक्षिणात्यं,[1] स्टेनकोनो वैदर्भं, पं० सारस्वतो लाटं[2] मनोमोहनघोषश्च मध्यदेशोद्भवं मन्वते ।[3] अमी यथार्थतर्का अपि विद्वांसो न सन्ति साधुनिर्णयजुषः । परम्परया पूर्वजानां राजकविकुले जातत्वात्, फलतो विदर्भचेदिकान्यकुब्जदेशमेदिनीषु कलितावासत्वात् कविराजः साकं पित्रा महोदयेऽत्रोधवाल्यं यापयित्वा सर्वत्र विद्यावाप्तये[4] कुतूहलवशाद्वाऽवश्यमेव देशाटनं व्यधासीत् । येन निसर्गतः तदीयकाव्येषु दक्षिणभारतस्य विविधस्थानप्रथानां द्रविडकर्णाटलाटललनानाञ्च सूक्ष्मलावण्यानां वर्णनप्रावीण्यं दृश्यते । औचित्यविचारचर्चायां क्षेमेन्द्रोऽप्येतदेव तथ्यं प्रथयति—

कर्णाटीदशनाङ्कितः शितमहाराष्ट्रीकटाक्षक्षतः
प्रौढान्ध्रीस्तनपीडितः प्रणयिनीभ्रूभङ्गवित्रासितः ।
लाटीबाहुविचेष्टितश्च मलयस्त्रीतर्जनीतर्जितः
सोऽयं सम्प्रति राजशेखरकविर्वाराणसीं वाञ्छति ५।२७

कविर्लाटवासिनां प्राकृतपटुत्वं प्रशंसति[5] तत्रत्यकवयित्र्याः प्रभुदेव्याश्च सस्नेहं स्मरतीति[6] पं० केदारनाथशर्मणा सम्भावितम्—'राजशेखरः प्रथमावस्थो लाटराजाश्रितोऽभूत् पश्चाच्च महेन्द्रपालमाशिश्रिये ।' किन्तु वस्तुतो विश्लथेयं सम्भावना । विभिन्नप्रान्ताङ्गनानां कामचेष्टाः (बालरामायणम् १०।४८, ६८, ७०–७३, ७५, ८१–८२, ८७) भाषणनैपुणीञ्च (काव्यमीमांसा पृ० ३३–३४) वर्णयन् राजशेखरः क्व क्व राजाश्रयमुररीकुर्यात् ? लाटस्य विदर्भपार्श्ववर्त्तितया कविना कृतमात्मीयतामयं चित्रणम् । अथ लाटनाम्ना विदर्भमपि प्रायः परामृशति सः । कर्पूरमंजर्या एकैव नायिका क्वचन विदर्भवर्त्तिवत्स-

———

१ Karpūramañjarī, konow, Preface P. 181.

२ काव्यमीमांसा, विहारराष्ट्रभाषापरिषद् (१९५४) कविराजराजशेखर पृ० ८

३ Introduction to Karpūramañjarī, Dr. Ghosh, P. 66-68.

४ तदानीं विद्याध्ययनकृते न तथा कान्यकुब्जनगरं विदितचरमभूत्, यथोज्जयिनीवत्सगुल्मे । काव्यमीमांसायां तत्रत्यभूभृतां विद्यानुरागः प्रशंसितो वर्तते । (काव्यमीमांसा पृ० ५०-५५)

५ बालरामायणम् १०।६८-६९, काव्यमीमांसा पृ० ३४

६ सूक्तीनां स्मरकेलीनां कलानाञ्च विलासभूः ।
प्रभुदेवी कविर्लाटी गताऽपि हृदि तिष्ठति ।। सूक्तिमुक्तावलिः ४।९४

गुल्मनगरस्य क्वापि च लाटदेशस्य राजकुमारी कथितास्ते ।[1] काव्यमीमांसाया देशविभागे (पृ० ९३) न कोऽपि दक्षिणापथान्तर्गतः विदर्भव्यतिरिक्तो लाट-जनपदोऽङ्कितः, इतश्च विदर्भवासिनः समुपेक्ष्य लाटवासिनां भाषणपटुत्वमुट्टङ्कितं (पृ० ३४) समीक्ष्यते । अनेन कथञ्चित् प्रतीयतां यद् बाल्यपर्यटनेन दाक्षिणात्यदेशानां विवेचनं न साधीयोऽमुना कृतमासीत् ।[2] राजशेखरो भारतस्यौदीच्यसीमस्वपि कदाचिद् व्यचरदिति तस्य बाह्लीकीदन्तक्षतानुरागो लम्पाकीकेशरचनाप्रियत्वं च प्रत्याययतः[3] ।

कविपत्न्या अवन्तिसुन्दर्या नाम मैथिलीगान्धारीपाञ्चालीवत् पश्चात्कल्पितमाभाति । एवञ्चावन्तिक्षत्रियकन्यकया स्नेहचणः परिणयो राजशेखरस्य किंचित्कालिकनिवासं तत्रानुमापयति । मनोर्थ्यागादुज्जयिन्या महाकालेश्वर- (बालरामायणम् १०।८०) संस्कृतप्रेमकाव्यकारपरीक्षा (काव्यमीमांसा पृ० ५०, ५५) कामिनीसञ्चरणवीक्षणस्थितिरतकर्मप्रशंसा (बालरामायणम् (१०।८१) तस्य यौवनोद्भेदानेहसि तत्रैव संस्कृतसाहित्यस्योच्चतमां शिक्षावाप्ति सूचयति । अनन्यसंस्कृतकविसाधारणतयाऽवन्तिसुन्दर्याः समादरः, काव्यमीमांसायां तदीयमतबहुमतं, विवाहोऽनुलोमश्च कथं न शक्नुवन्तु निगमयितुं विदुष्याः सहाध्यायित्वं तस्याः ?

विधिवदधीतवेदव्याकरणपुराणदर्शनज्योतिषार्थशास्त्रराजनीतिविषयो विकसितसारस्वतसत्त्वशेवधी राजशेखरो ९०० खिस्ताब्दतः पित्रा सार्धं महेन्द्रपालपरिषदि राजकवित्वं प्राक्रमीत् । बालरायायणप्रमुखषट्प्रबन्धप्रणयनेन राजानं दशवर्षैरेव प्रतिभाप्रभावितं कृतवान्[4] । महेन्द्रपालस्तस्मै बालकवि-कविवरेण्य-

---

१ 'अत्थि एत्थ दक्खिणावधे वच्छोमं णाम णअरं, तहिं सए एक्कं कण्णारदणं दिट्ठं ।' एवं 'अत्थि एत्थ लाडदेसे चण्डसेणो णाम राआ, तस्स दुहिदा घणसारमंजरी त्ति ।' कर्पूरमंजरी पृ० २६, १०४

२ द्रष्टव्यो मदीयशोधग्रन्थः प्रयागविश्वविद्यालयेःसमर्पितः बालरामायण का मूल्याङ्कन' पृ० १८ अधःटिप्पणम् ।

३ 'बाह्लीकीदशनव्रणारुणदलैः पत्रैरशोकोऽर्चितः ।' बालरामायणम् ५।३८ विद्धशालभंजिका १।२५
तथा 'लम्पाकीनां किरन्तश्चिकुरविरचनाम् ।' बालरामायणम् ५।३३

४ 'विद्धि नः षट् प्रबन्धान् ।' बालरामायणम् १।१२

गुरूपाध्यायोचितं चादरमदात् ।[1] दैवज्ञाः सहसैवामुं वाल्मीकिभर्तृमेण्ठभवभूतीनां प्रत्यक्षावतारं बभाषिरे ।[2] पश्चान्महीपालस्य पालकत्वे बालभारतं काव्यमीमांसाञ्च रिरचयिषुः प्रवासव्यसनेन तत्प्रकरणं समाप्य चेदिदेशे (वर्तमानजबलपुरं निकषा) त्रिपुरीमलञ्चकार । कलचुरिनरेशाश्रयेऽत्र व्यरचिषत कर्पूरमंजरीविद्धशालभञ्जिकाद्या नाटिकाः । तत्तद्भाषासु विविधप्रबन्धेषु सकलरसचक्रवालेषु च स्वतन्त्रप्रसरः कविराजो नितरां त्रिपुरीगतो विरेजे ।[3] बालभारतकाव्यमीमांसयोरवशिष्टभागाः केचनान्ये ग्रन्थाश्चेह सम्पूरिता स्युरिति न सुशकमप्राप्तिहेतोर्वक्तुम् ।

प्रथमयुवराजदेवस्य कर्पूरमञ्जर्याः प्रस्तावनायामनुल्लेखो विद्धशालभञ्जिकायाञ्च विमनस्कसङ्केतः कथं न प्रत्याययतां यद्राजशेखरः त्रिपुर्यां राजाश्रये सन्नपि राजकविपदवीं न समवाप । कविराजो महीपालानन्तरं क्षीयमाणां प्रतीहारश्रियमभिनन्दयितुं न पुनर्महोदयमजिगमिषत्, त्रिपुर्यामेव च मानीव पञ्चाननो यापितवानवशिष्टजीवनमिति सुप्रतीतं, यतो द्वितीययुवराजदेवस्यापि बिल्हरीलेखे वर्तमानप्रौढकवेरिव तस्योल्लेखो वर्तते । काले-काले विदर्भयात्राप्रसङ्गतो दाक्षिणात्यदेशाः भूयो विहृताः स्युरिति तद्वर्णनप्रेम्णा प्रमाण्यते । ऐश्वर्यसम्पन्नयौवनादेव त्यागसौजन्यपराक्रमोपकारादयो व्यकसन् कविगुणा राजशेखरस्य ।[4] अप्रतिहता पण्डितराजजगन्नाथस्येव काव्यधारा समग्रजीवनं सरसं

---

१ बालकई कइराओ णिब्भरराअस्स तह उवज्झाओ ।' कर्पूरमंजरी १।९
एवं बालरामायणम् १।५, १८ तथा पृ० ९ ।

२ बभूव वल्मीकभवः पुरा कविस्ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।
स्थितः पुनर्यो भवभूतिरेखया स वर्तते सम्प्रति राजशेखरः ॥
बालरामायणम् १।१६

३ 'यस्तु तत्र तत्र भाषाविशेषे तेषु प्रबन्धेषु तस्मिंस्तस्मिंश्च रसे स्वतन्त्रः स कविराजः ।' काव्यमीमांसा पृ० १९

४ आपन्नार्तिहरः पराक्रमधनः सौजन्यवारांनिधिः
त्यागी सत्यसुधाप्रवाहशशभृत् कान्तः कवीनां गुरुः ।
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः ॥ बालरामायणम् १।१८
अत्रोर्ध्वपंक्तिद्वयविशेषणानि प्रसङ्गतो राजशेखरस्य महेद्रपालस्यापि च वर्त्तन्ते ।

कृतवती; परन्तु वार्द्धक्ये माघस्येव दुर्ललितेन परोपकारव्यसनेन कवेरासन् क्लेशविपाका:[1]। यदि सदुक्तिकर्णामृते प्रसन्नसाहित्यरत्नाकरे च राजशेखर-नामतः समुद्धृतेयं वसन्ततिलका-निजोक्तिरस्तु कवेस्तर्हि चरमभागे जीवनस्य कल्प्यतामवन्ति-सुन्दरीवियोगोऽपि ।

अध्वश्रमाय चरणौ विरहाय दारा अभ्यर्थनाय वचनञ्च वपुर्जरायै ।
एतानि मे विदधतस्तव सर्वदैव धातस्त्रपा यदि न किन्न परिश्रमोऽपि ॥

परवर्त्तिकाले कुन्तकादयः समीक्षकाः पीयूषवर्षप्रभृतयः कवीश्वराश्च राजशेखरकृतीनां भूरिसमादरानुकरणं चक्रुः, किन्तु जीवनकाले सम्भवतः कविर्न प्रतिष्ठां समुचितामाप्तवान्, यतो निस्सृताः साक्रोशवाचः—

'ब्रूते यः कोऽपि दोषम्…………' (बालरामायणम् १।१२)

तथा 'जनापवादमात्रेण…………कस्मैचिद् यदि रोचते ।'

(काव्यमीमांसा पृ० ५१)

वस्तुतो भारविसमयादेव सप्तमशताब्दीतः संस्कृतकवीनां पाण्डित्यप्रदर्शन-रुचीनां परतितिक्षाप्रवृत्तिः ह्रासोन्मुखत्वमापन्नाऽऽसीत् अन्येऽपि राजशेखरादनल्पी-यांसं तात्कालिकनिरादरखेदं प्रकटीचक्रुः भवभूतिपण्डितराजादयः कवीश्वराः[2]।

---

१ 'किमपरमपरैः परोपकारव्यसननिधेर्गणितैर्गुणैरमुष्य ।' विद्धशालभंजिका १।६

२ 'यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः । अतिदुर्जनइति वक्तव्यम् ।'

उत्तररामचरितम् १।५

'ये नाम केचिदिह नः प्रथयन्त्यवज्ञाम् ……।' मालतीमाधवप्रस्तावनायाम् ।

तथा—'विद्वान्सो वसुधातले परवचः श्लाघासु वाचंयमाः…………

आस्ये धास्यति कस्य लास्यमधुना…………वाचां विलासो मम ॥'

भामिनीविलासः । ४३

रामनारायणतर्करत्नस्य दक्षयज्ञमहाकाव्यम्

रामजी उपाध्यायः

कविपरिचयः

दक्षयज्ञमहाकाव्यस्य[1] रचयिता श्रीरामनारायणतर्करत्नः कलिकातायां संस्कृतविद्यामन्दिरे शिक्षक आसीत्। अस्य विषये श्री राजेन्द्रलालमित्रो लिखति–

"Professor Rāmanārāyaṇa Tarkaratna of the Calcutta Sanskrit College, to whom we are indebted for the poem, is a distinguished scholar for his interesting works in Bengali"[2]

इण्डियन मिरर नाम्नि समाचारपत्रेऽस्यकवेर्विषये कथितम्– "The author's name is well known all over Bengal. He is a veteran worker in the education department and for a long series of years has had the distinction of teaching of a very large number of the young men of this city. He is an author and a wit of no mean reputation and his dramas have been frequently, represented on the stage."[3]

कवेर्व्यक्तित्वं तस्य काव्यात् परिचीयते। तद्यथा–स भवान्याः परमो भक्त आसीदिति पञ्चमसर्गे भवान्याः पञ्चाशत्पद्यात्मकस्तुत्या स्पष्टं भवति। काव्यस्यास्य प्रणयनं तेन 'भवानीं-भव-भक्ति-योगात् कृतम्'।[4] कविरयं निरभिमान आसीत्। पञ्चमसर्गावसाने सतीप्रार्थनानन्तरं स वरं याचते—

तदपि जननि याचे गर्वहीनं जगत् स्यात्। ५.५६

काव्यप्रणयनं नाम गर्वं जनयतु कस्यापि हृदये, अस्य कवेर्विषये तु एतदेव सत्यम्—

---

१ ग्रन्थोऽयं १८८१ ई० वर्षे कलिकातायां हरिश्चन्द्रतर्करत्नेन प्रकाशितः। पुस्तकमिदं इन्दौरस्थराजकीयसंस्कृतमहाविद्यालये विद्यते।

२ Review published in the Hindu Patriot 24, 1881

३ Review on 6th Nov. 1881

४ द० य० १०.३८

तद् दक्षयज्ञं प्रणिनाय काव्यं यत्नेन तन्नात्मकवित्वगर्वात् ॥ १०.३८

कथापरिचयः

दक्षयज्ञस्य दशसर्गेषु क्रमशः– १. दक्षरोषः २. यज्ञायोजनम् ३. वर्षा-वर्णनम् ४. रुद्राक्षवनप्रवेशः ५. सतीस्तोत्रम् ६. कपटकोपः ७. सतीगमनम् ८. सतीतिरोधानम् ९. दक्षयज्ञध्वंसः १०. दक्षगर्वशमनं चेति प्रकरणानि सन्ति। महाकाव्यस्यास्य कथा खलु पौराणिकी। अस्य कथायां बहव आदर्शा गुम्फिता यैरूनविंशशताब्द्या महाकविरयं समाजं संधारयति।

नायकोऽस्य शिवः। तस्य शक्तिः सती भार्या नायिका च। अत्र यज्ञः, सतीगमनं, सतीतिरोधानं, यज्ञविध्वंसो गर्वशमनं चेत्यादीनि तादृशानि सन्त्या-ख्यानानि येषु कवेः सहृदयस्य च सर्वोच्चरसमयप्रकल्पनाः सम्भाव्यन्त इति सर्गाणां प्रकरणैः सुस्पष्टमेतत्।

रामनारायणस्य सहृदयहृदयानुरञ्जनकला-साधनायामपूर्वकौशलं प्रकटितम्। तद्यथा–शिवं विहाय सर्वे जामातारो दक्षाय प्रणतिपरम्परां भृगुयज्ञे प्रस्तुत-वन्ति। शिवस्य प्रतिशोधो दक्षेण कार्यः। कथं तद् भवेत्? न विद्यते भवन-मपि शिवस्य यदग्निसात् क्रियेत। इत्थं विचिन्तयतो दक्षस्य मनःस्थितेः स्वाभाविकं चित्रणम्—

न विद्यते सद्म यदस्य भज्यते श्मशानवासैकरतस्य शूलिनः।
मयास्य भिक्षोः किमु हार्यते बलादकिञ्चनः सोऽस्य धनं न किञ्चन ॥ १.११

मनसि तस्य बहवो विकल्वाः समुद्भवन्ति–अपि निर्वास्येत स शिवः, कथम्? अविषयः सः। अप्यवमन्येत, कथम्? मानवर्जितः सः। हते तस्मिन् विधवा मे पुत्री भविष्यति। भवतु, यत् स्यात् तत् स्यात्। शिवस्य वध एवैककोपायः। अपि जले निक्षिप्यतां सः, किन्तु—

गङ्गाजटाजूटपुटान्तरे पुरा
श्रान्तं भ्रमन्ती न तदन्तमाययौ।
तस्माज्जले क्षेपणमस्य मृत्यवे
तज्ज्ञोचरी सा विफला विचारणा ॥ १ १७

एवं चिन्ता–निमग्ने तस्मिन् तस्य सुहृद् दधीचिरागच्छति। तस्य चिन्ताहेतुं श्रुत्वा स आह - अहो तव विमूढता—

सृष्टिस्थितिप्रत्ययवहारकारणात्
विश्वात्मनो विश्वपतेः शिवात् पुनः।

सम्माननामिच्छसि किं प्रजापते
प्रोच्चैरयं मोहविलास एव ते ॥ १.५५

एतच्छ्रुत्वा दक्षो ऽति संक्रुद्धो ऽभूत् ।
नारदात् तस्य कार्यमसिद्धचत । दक्षस्तमाह

वध्यतां वध्यतां शीघ्रं गत्वाद्यैव स मूढधीः ॥ २.२४

नारदस्य मनस्यासीत्— दक्षस्य गर्वनाशो ऽवश्यमेव कार्य इति । स प्रथमं शिवं निनिन्द । यथा—

किमाकारः किमाचारः किंवृत्तिः किंगतिर्हरः ।
तस्मात्तस्मिन् युद्धयात्रा मया राजन् निषिध्यते ॥

व्याजस्तुतिमनधिगच्छन्नेकस्तु समर्थको मया लब्ध इति कृत्वा दक्षः प्रसन्नमना अभवत् । अत्र कविराह

द्व्यर्थादस्माच्च तद्वाक्यान्निन्दार्थो जगृहेऽमुना ।
पयोधराज्जलौकास्ये रक्तं स्रवति नेतरत् ॥ २.६२

नारदस्य निर्देशानुसारं दक्षेण यज्ञोऽनुष्ठितः । तत्र शिवं विहाय सर्वे देवा आमन्त्रिताः । नारद एव सर्वान् देवानामन्त्रयत् । अन्ततः स कैलासं गतवान् । शिवस्तु

दक्षदुर्नयमाकर्ण्य शान्तात्मा विश्वभावनः ।
स्मितमेवोत्तरं कुर्वन् नान्यत् किञ्चिदभाषत ॥ ४.५०

नारदस्य मनस्यभवत्— व्यर्थमेवात्रागमनं मम । भवतु, शिवभार्यां तावत् कथयिष्यामि । स शिवमपृच्छत्— कुत्र विद्यते सतीति । शिव उवाच— न खलु सा अस्मिन् विषये वाच्येति । किन्तु नारदः शिवस्य वचनं नैव जग्राह ।

काव्येऽस्मिन् महाकाव्यपरम्परानुसारं वर्णनानामुत्कर्षो दृश्यते । तृतीयसर्गे वर्षावर्णनमभूतपूर्वमेव ।
तद्यथा—

सकलशस्यसमुद्भवसाधन-
मृतुरयं सजलो जलदागमः ।
क्षितिरजःशमनः क्षितिपाधुना
शमयताद् भवदन्तरजं रजः ॥ ३.३६

चतुर्थसर्गे नारदः सर्वान् देवादीन् निमन्त्र्य शिवं प्रतिगतः दक्षयज्ञसमाचारं च तस्मै न्यवेदयत् । शिवेन निषिद्धो ऽपि नारद इमां वार्त्तां सतीमकथयत् । षष्ठसर्गे रुदन्तीव सती शिवमाह—बहुकालो गतो मे पित्रोर्वार्ताप्राप्तेः । अतः—

अनुमतिं कृपयार्पय मे प्रभो—
विजयया सह यामि पितुर्गृहम् ।
पुनरिहागमनं भविताशु मे
कृतनतेर्जननीजनकांघ्रिषु ॥ (६.३७)

शिवोऽकथयत् - कथं मद्विना भवती यास्यति ?—
इह पतिं परिहृत्य पतिव्रते
कथय तत् कथमेव गमिष्यसि ॥ ६ ४२ ॥

शिवोऽशेषां भाविनीं स्थितिमवलोक्याह-- अयुक्तं निमन्त्रणं विना परगृह-गमनम । अवमानिता भवती भविष्यति । सत्यानुरुद्धो शिवोऽचिन्तयत्— न खलु अनुमतिं दास्यामि । नैषानुमतिं विना गमिष्यति । किन्तु सती अवोचत्— कथं भवान् पित्रोर्गृहं परगृहमिति कथयति ? रुष्टा साऽब्रवीत्—
वदति यः पितरं परमेव मे
त्रिभुवनेषु स एव परात्परः ॥ ६ ५६)

सतीशिवौ विजयाद्वारेण परस्परमनिन्दताम् । क्रोधेन जाज्वल्यमानायां सत्यां शिवोऽकथयत्—
निदेशमस्या गमने ददाम्यहं
त्वमधुना स्निग्धसखी प्रसाद्यताम् ॥ ७.६

स बद्धाञ्जलिः सतीं स्तौति स्म—
केशरिपृष्ठे महति गरिष्ठे नियतं निवससि वामा
भुवन- मनोहर- समधिक- सुन्दर- रुचिरतिमध्यक्षामा ।
देवीकामविनाशनकारणमपिपूरितजनकामा ।
त्वं भुवनेश्वरि जननि महेश्वरि भवसि गुणत्रय धामा ॥ ७.१०

शिवस्तुतिभिःप्रसन्ना सती प्राह—
नाथामि ते नाथ पदाम्बुजेष्वहं कृपास्तु ते मां कृपणां प्रति प्रभो ॥ ७.२०

शिवोऽवदत्— नन्दिना सह गच्छतु भवती । विजयात्र मामनुचरिष्यतीति। सती वृषभामारुह्य पितृगृहाय प्रस्थिता। प्रस्थानसमये संभ्रमवशाच्छिवाय स प्रणतिनिवेदनमपि नाकरोत् । मार्गेऽपशकुनान्यभवन् ।

कनखले यज्ञो भवति स्म । महान् सम्भारः सज्जा च तत्रासीत् । नारदेन सह दक्षो यज्ञस्थलीं प्राविशत् । तेन पृष्टो नारद आह—
केवलं देवदेवेषु न देवत्रयमागतम् ॥ ८.२२
विना निमन्त्रेण हरो हरेणैव विना हरिः ।
आभ्यां विना विरञ्चिस्तु त्रयस्ते नागता मखे ॥ ८.२४

दक्षश्चिन्ताकुलोऽभूत् । सो व्यचारयत्– वृद्धः खलु विधाता । विचित्रा च वृद्धानां प्रकृतिः–

अविचार्यचरित्रा हि वृद्धा भद्रैरनादृताः ॥ ८.२८

किन्तु यज्ञेश्वरो विष्णुर्नागत इति विचार्य पर्युत्सुको दक्षोऽभवत् । तं नारदो ऽब्रवीत्– एकरूपौ खलु हरिहरौ । हरिरामन्त्रितो ऽभविष्यत् नाम । स खलु भवतामवाञ्छनीयः । तदा हि–

तस्यागमे ऽर्धदेहस्य हरस्यैव समागमः ।
शिवस्यागमने चात्र नाशिवो घटते मखः ॥ ८.३४

अत एव विष्णुरपि निवारितो मयेति ।

यज्ञ आरब्धः । तस्मिन्नेव समये सती नगरमागता । नागरिकैस्तस्या स्वागतं व्याजह्रुः । तस्या जननी प्राह–एह्येहि वत्से कल्याणि मदीयाङ्कमलं कुरु इति ।

त्वदङ्गसङ्गादङ्गानि मम यान्त्वाशु निर्वृतिम् ॥ ८.४६

अभिमानिनी सती पितृगृहं न प्राविशत् । सा यज्ञस्थलं गता । तामवलोक्य क्रुद्धो दक्षो ऽब्रवीत्—

कथं त्वं मत्सुता भूत्वा विना यज्ञे निमन्त्रणम् ।
आगतासि मम क्लेशविपायायात्र दुर्भगे ॥ ८.६१
सत्यं जातासि मत्तस्त्वं मम प्राणाधिका सुता ।
कुपात्रस्थतया दुष्टा यथा चाण्डालभाण्डकाः ॥ ८.६२

सती सविनयं पितरमवादीत्– कामं मां निन्दतु भवान् न पुनर्मे पतिम् —

कन्या तेऽहं यथेच्छं त्वं वद सम्प्रति मां प्रति ।
पत्युर्जगत्पतेस्तस्य निन्दां मा कुरु मा कुरु ॥ ८.७१

सा पतिं प्रशशंस–

तं विना यजनं दूरे कः स्थातुमपि शक्नुयात् ॥ ८.७६

क्रोधवह्निदन्दह्यमानहृदयो दक्षः प्रत्युवाच–

रे रण्डे षण्डमारुह्य महाजनजुगुप्सितम् ।
आयातासि कथं स्तौषि मच्छत्रुं मां, च निन्दसि ॥ ८.७६

क्रोधाविष्टा सती प्रतिवचनं दत्त्वा निर्णीव्रती

मयैतां स्वामिनो निन्दां श्रुत्वा यत्पापमर्जितं ।
तत्क्षालनार्थं प्राणान्तं प्रायश्चित्तं चराम्यहम् ॥ ८.८५

अन्तिमक्षणे सा पतिमस्तौत्–

हा नीललोहित हर प्रमथेश शम्भो
हा चन्द्रशेखर शिव त्रिपुरान्तकारिन् ।
त्वत्पादपद्ममनुनाथति नाथ भूया-
ज्जन्मान्तरे ऽपि तव शङ्कर किङ्करीयम् ।। ८.९२

नन्दी दक्षाय शापं दत्त्वा शिवायेदं वृत्तं निवेदयितुमधावत् । इतस्तु शिवः सतीवियोगवह्निना सन्तप्त आसीत् । सतीवृत्तं श्रुत्वा सो ऽरुदत् ।

प्रिये क्वासि क्वासीत्यवददिह स प्राकृत इव । (९.१८)

यदा दक्ष एव मे भार्यानिधनकारणमिति स ज्ञातवांस्तदा–

त्रिनेत्रं शोणं तज्जलमनलतापादिव विभोः
क्षणाच्छुष्कं तीव्रो मनसि कटुभावः समजनि ।
तथा तीक्ष्णा दृष्टिः सपदि रिपुनिर्यातनमतिः
स्वशूलस्याकर्षो ऽजगवधनुरास्फालनमपि ।। ९.२२

स स्वजटाजूटादेकं केशं निस्सार्य क्षिप्तवान् । ततो वीरभद्रः प्रादुरभूत् शिवमपृच्छच्च– किं मया करणीयमिति । शिवो ऽवदत्–

गत्वा शीघ्रं मद्गणैः सङ्गतः सन्सार्धं दक्षेणास्य यज्ञं जहि त्वम् ।। ९.२६

वीरभद्रः प्रधावन् यज्ञस्थलं गतः । येन मुण्डेन दक्षः शिवमनिन्दत् तमुच्छिद्याग्नौ स जुहाव । ततो घोरयुद्धं प्रववृते । दक्षस्य सर्वे सहायका हताः हव्यं तु शिवस्य भूतैर्भक्षितम् । तैः यज्ञीये वह्निकुण्डे मूत्रविसर्जनं कृतम् । ऋत्विजस्ताडिताः । यज्ञे समायाता देवाश्च सघातं निर्वासिताः । यज्ञस्थलं श्मशानभूमिरभवत् । अग्निदेवः स्ववाहनमजं विहाय प्रद्रुतः । शिवसैन्यान्नास्ति कुतो ऽपि त्राणमिति विचार्य प्रधावन्तो देवा ब्रह्माणमगच्छन् । स शिवं स्तौति स्म । प्रसन्नेन शङ्करेण वीरभद्रो निवारितः । ब्रह्मा शिवं स्तुवन् दक्षजीवनदानार्थं प्रार्थितवान् । शिवेन सङ्केतितो नन्दी अग्निवाहनस्याजस्य शिरो दक्षग्रीवायां समयोजयत् । ततो दक्षः शिवमस्तौत् । स्तुतिप्रभावेणाजमुखं विगलितं स्वमुखं लब्धं च तेन । ततो दक्षो वरमयाचत–

सङ्कल्पसिद्धिरिह यज्ञकृतो ममास्तु ।। १०.२१

तस्मिन्नेव समये शिवः सत्याः शवमपश्यत् । स तमालिङ्ग्य सविलापं ननर्त–

उन्मत्ततामधिगतो वनिताननुं तां
स्कन्धे कदाचिदथ पृष्ठतले कदापि ।
कण्ठे क्वचिच्छिरसि वा हृदि वा च धारं
धारं रुरोद च ननर्त जहास शम्भुः ।। १०.३२

शोकोन्मत्ततया ऽनया सृष्टिनाशं सम्भावयन् विष्णुः सतीशरीरं खण्डशः

कृत्वा अपातयत् । सतीशवाद्वियुक्तः शिवः तपः समाचरितुमगच्छत् । यत्र यत्र सतीशरीरखण्डाः पतितास्तत्र तत्र तीर्थ-पीठ-स्थानानि संजातानि ।

उपर्युक्तकथायाः कलात्मकचमत्कारेण सह कविना विकासः कृतः । नारदस्य द्विविधगत्या द्व्यर्थकथनैश्च कथानके पतनान्तसमुच्छ्रयो व्यज्यते । अनेन खलु किञ्चिदसाधारणं तत्त्वं समुन्मिषितम् ।

कथाप्रपञ्चे भावानां प्रतानाय घटनाक्रमः सविमर्श विन्यस्तः यथा नवम-सर्गे शिवः सतीवियोगाग्नौ सन्तप्तोऽस्ति । तस्मिन्नेव काले नन्दी समागत्य सतीप्राणान्तं सूचयति । एतादृशि स्थितौ शिवस्य रुद्ररूपवर्णनं प्रारभ्यते कविना ।

चरित्र-चित्रणम्

दक्षयज्ञमहाकाव्ये कविना स्वभावत उदात्तचरितानां कथा विस्तारिता । चरित्र-चित्रणेन पात्राणां व्यक्तित्वं मनोरमं संवृत्तम् । शिवः स्वजटातः केशमेकं निस्सार्याक्षिपत् । स वीरभद्रोऽभवत् । कीदृशः स आसीदिति तस्यैव मुखाच्छ्रूयताम्—

> गण्डूषेर्णवार्णवान् शोषयामि
> ज्योतिश्चक्रात् सूर्यमुत्पाटयामि ।
> किं पातालं भूतलं प्रापयामि
> ब्रह्माण्डं वा चूर्णयामि क्षणेन ।। ९.२८

अत्र कथानायको दक्षप्रजापतिः प्रतिनायकश्चशिवः । प्रतिनायकस्य व्यक्तित्व-मुदात्ततरंमित्यत्र वैशिष्टयम् । सामरिकबलेनापि प्रतिनायको नायकमतिशेते । तस्यैकस्मात् केशाज्जातो वीरभद्रोऽशेषं दक्षसैन्यस्य दक्षस्य च विनाशायालम् ।

शिवस्य रूपं द्विविधम्–शान्तं प्रलयंकरञ्च । द्वयोरप्येतयोः स्वरूपयोश्चित्रणे कविः समर्थः । वस्तुतस्तु शिवो विधातास्ति न संहर्त्तेति कविरत्र व्यञ्जयति । तेनावर्जितः संहारो निर्माणबीजमेव । शिवस्य नाटचलीलारहस्योद्घाटनं काव्यस्य प्रधानप्रयोजनं प्रतिभाति । सतीशवेन शिवो नृत्यति इति प्रकरणेन तस्य चरित्रेऽलौकिकं विधानं सुप्रणीतम् ।

नारीचरित्रानुशीलनार्थं सतीचरितं महत्त्वपूर्णमेव । सत्या उत्तालभावावेश-तरङ्गैरौचित्यहिमगिरिरपि तरलितः । एतादृशि स्थितौ सा प्राणात्यागेनापि मनोनिविष्टं सत्यं प्रमाणयितुमभिलषति । यदि स्त्रीमवगन्तुमिष्यते तर्हि सत्या दशरूपाण्यवलोक्यन्ताम् । एतान्येव नार्या दशरूपाणि यैर्नारीजगद् - वैचित्र्य-मण्डितम् ।

वर्णनानि

अस्मिन् लघुमहाकाव्ये वर्णनानां विस्तरो नास्ति । तथापि तृतीयेसर्गे स्ववर्णनवैदग्ध्यं प्रकटीकरोति कविः । अत्र वर्षर्तुवर्णनं गुम्फितम् । वर्णनपद्धतिर्न श्रृङ्गारपङ्कपङ्किलेत्यत्र कवेरन्यः पन्थाः । एतादृशिवर्णनान्यार्षमहाकवीनां लेखनीतः प्रसूतानि । कालिदासेन यावदेतादृशानां वर्णनानां रातिः प्रवर्तिता किन्तु ततः परं सा विलुप्ताभूत् । अत्र श्रृङ्गारचर्चा उपमानरूपेणैव केवलं समानीता । यथा—

रक्ता क्वचिदनेहसि वा विरक्ता
गाढाविला क्वचिदथो विमला क्वचिच्च ।
कस्मिन्नसौ धनरसं वितरत्यजस्र
वाराङ्गनेव गगनाङ्गनभूमिरद्य ।। ३.३५

कविना क्वचिद् वर्षावर्णने वीररसभूमिरभिषिक्ता । यथा—

पाथोमुचां ततिषु धीरगभीरनादं
सम्पास्त्रविष्फुरणमभ्युदितं धनुश्च ।
धाराशुगप्रपतनं नियतं निरीक्ष्य
को निश्चिनोति गगने न रणस्थलत्वम् ।। ३.२३

जीमूतयूथवृत अशुगवृष्टिपातै---
रुच्चैर्गभीरनिनदैर्ऋतुरेत्यरोपात् ।
तापं प्रजासु दधतं कृपणासु भीमं
ग्रीष्मं विजित्य सहसा शमयाञ्चकार ।। ३.२४

अपरञ्च केतकीवर्णनं निदर्शनीयं । कविस्तस्या केतक्या रूपहीनतां धिक्करोति किन्तु क्षणानन्तरमेव तदस्तित्वं धन्यं मनुते । यतः —

रूपं यथा तव तथास्तु न चात्र हानि—
र्भृङ्गोऽपि सङ्गमयते यदि वा न वा ते ।।
धन्या त्वमेव ननु केतकि भूतले यत्
पूर्णं जगत् तव हि सौरभगौरवेण ।। ३.२९

वर्षावर्णनप्रसङ्गे कविना निम्नाङ्कितवस्तूनां काव्यात्मकस्वरूपं दर्शितम्—

सौदामिनी, कमलवनं, कुटजः, केतकी, हंसः, सूर्यः, चन्द्रः इन्द्रधनुः, पूर्वानिलः, कोकिलः, चातकः, नीलकण्ठः भेकः, द्विरेफः, पान्थकान्ताभिसारिका, वारस्त्री, खद्योतः, चकोरः काकश्च ।

कवेः प्रकृतिं प्रति मनोभावोऽधोनिदिष्टः —

सकलशस्यसमुद्भवसाधन—
मृतुरयं सजलो जलदागमः ।
क्षितिरजःशमनः क्षितिपाधुना
शमयताद् भवदन्तरजं रजः ।। ३.७६

शैली

शब्दयोजना

दक्षयज्ञमहाकाव्यस्य कर्त्ता हि आर्षपद्धतेरनुयायीति पूर्वमेव स्पष्टीकृतम्। तेन पाण्डित्यप्रदर्शनाय विषये दुर्बोधता नाविष्कृता न च विद्वदौषधरूपेण काव्यं रचितम्। नैषा रचना 'आत्मकवित्वगर्वात्' कृता अपितु भवानीभक्तियोगादिति स्वयमेवोक्तं कविना । इत्थं कवेरस्य सरणिरश्वघोषस्य सरणिमनुहरति । कविरयं स्वभावतः सहजभावेन सरलभाषामाश्रित्य प्रबध्नाति। सरलसुपरिचितशब्दा एव कविना प्रयुक्ताः ।

अलङ्कारयोजना

अलङ्काराणां जटिलता काव्ये नास्ति । अलङ्काराणां सन्निवेशो विषयस्य सुबोधतायै भावानां प्रभविष्णुतायै रमणीयतायै च कृतः । क्वचित् प्रयोजनवशादलङ्काराः प्रयुक्ताः । यथा नारददक्षयोः शिवमधिकृत्य वार्त्तायां नारदो दक्षस्य चाटुकारितां संलक्ष्य शिवं निन्दति किन्तु श्लेपबलाद् वाक्यानामर्थः शिवप्रशस्तिपरः । उदाहरणं यथा—

अनवस्थः स्वयं शम्भुरकर्मा परकर्मभुक् ।
उदासीनः पराधीनो योद्धुं गम्यः स ते कथम् ।। २.४८
परिणामविहीनोऽयं निर्जरो वृषवाहनः ।
शक्तियुक्तः शिवो नित्यं दशमीस्थः कथं भवेत् ।। २.५६

कविना नारदस्यैतानि वचांसि द्व्यर्थानीति कथितानि ।[1] नारदो दक्षमाह—

नागमिष्यति तद्यज्ञमशिवं भो भविष्यति ।

अत्र शिवरहितोऽमङ्गलश्चेति द्व्यर्थकोऽशिवशब्दः ।
कविना क्वचित् श्लेषबलेन रूपकयोजनानिबद्धा । यथा—

———————

१ दक्षयज्ञम् २.६२

आत्यन्तिकार्त्तिशमनेऽमृतवर्षिणी या
सेव्या मरुद्भिरनुमोदित-नीलकण्ठा ।
सा कालिका चिरमभीष्टमथाष्टमूर्त्ते-
र्मूर्त्यन्तरं गगनमाक्रमितुं प्रवृत्ता ॥ ३.२

कवेः सरणिः सत्यमेव प्रभविष्णु यथा—

मत्तो मोहान्ध उन्मत्त कार्ये तुल्यास्त्रयस्त्विमे ।
यन्निपिद्धं प्रयत्नेन तत्कुर्वन्ति पुनः पुनः ॥ ८.८३

अत्र एको लोकः सत्यमिति निरूपितम् यो हि नित्यंदृष्टिगोचरो भवति । तद् दक्षविषयेऽपि परमसत्यं स्यादेव ।

अन्योक्तिप्रयोगेण महाकाव्यस्य कानिचित् पद्यानि सविशेषं महत्त्वं भजन्ते । यथा—

न प्लावितं क्षितितलं न च पूरितो वा
कूपस्तडागसरितां तु कथंचन दूरम् ।
तृष्णार्त्तचातकमुखेऽपि न बिन्दुपातः
जीमूतयूथ ननु गर्जसि किं मुधा त्वम् ॥ ३.९

पञ्चमसर्गे कवेः शब्दालङ्कारकौतुकं वर्तते यत्र पञ्चाशत्-पद्येषु सती-स्तुतिरकारादिक्रमेण क्रमशः प्रत्येकस्मिन् पद्ये कृता । क्वचित् प्रारम्भिकाक्षर-स्यानुप्रासः सम्पूर्णश्लोके कौशलेन सन्निविष्टः । यथा —

ज्योत्स्नाजिह्मगतिर्जनार्दनजनुर्जैत्रीजगज्जाड्यहा
जीवानां जयदा जया जयपरा ज्योतिष्मती जाग्रती ।
जित्वा दुर्जयनिर्जरारिनिवहान् ज्याभारसंहारिणी
जीयात् सा जगदम्बिका जितजरा जीवातुरत्रातुरे ॥ ५.२६

अन्यत्राप्यनुप्रासालङ्कारबाहुल्यं दृश्यते । तथाहि —

गोविन्दं गोपतिं गोपं गोपीजनमनोहरम् ।
गोवर्धनधरं गेयं तं वन्दे गरुडध्वजम् ॥ २.३

द्वितीयसर्गस्याद्वितीयादात्रयोदशं श्लोकं क-ग-च-ज-त-द-न-प-म-र-व-शाद्यक्षराणाम-नुप्रासयुक्तानि स्तोत्राणि संयोजितानि ।

रसः

काव्येऽस्मिन् भक्तिभावापूरनिर्झरिण्या अमन्द-प्रतत-प्रवाहो विद्यते । भक्ति-परकस्तोत्रेषु गीतितत्त्वस्य सुविचारितः सन्निवेशोऽस्ति । एषु स्थलेषु पदावली रसानुकूलं सुमधुरानुरणनं बिभ्रती राग-ताल-लयादिभिः सह नृत्यति तद्यथा—

हरो ब्रह्मचारी कलङ्कापहारी
शशाङ्कार्धधारी श्मशानप्रचारी ।
विपत्पातवारी सदन्तर्विहारी
भवत्राणकारी स्मृतौ मेऽस्तु नित्यम् ।। ४.३३

क्वचिद् गीतगोविन्दस्य रमणीया पदशय्याङ्गीकृता । तथा हि--

विकचकमलकुल–कलिकोपरिहरिदयितालम्बितवेशा
करिकरकलितकलसजलिलार्द्रितपूतविसारितकेशा ।
रक्ताम्बरधर-पीनपयोधर-वरतनु-मृदुमृदुहासा
करधृतकमलाविमलाकमलारूपमहोदधि शेषा ।। ७.१६

प्रसङ्गानुसारमस्मिन् काव्ये रौद्र-भयानकबीभत्सरसानां परिपाको समापादितः ।

छन्दोयोजना

महाकाव्येऽस्मिन् वार्णिकच्छन्दांसि प्रयुक्तानि । छन्दोयोजना हि ललिता । सर्गक्रमेण वंशस्थानुष्टुब्-वसन्ततिलकाशार्दूलविक्रीडितद्रुतविलम्बितवंशस्थ-विलोयजात्यनुष्टुप्शिखरिणीवसन्ततिलकानां प्रमुखता विद्यते । प्रायः प्रत्येकस्मिन् सर्गे नानाछन्दांसि प्रयुक्तानि । सर्गान्ते छन्दःपरिवर्त्तनं कृतमेव । स्तोत्र-गीतेषु पृथक्तया छन्दांसि प्रयुक्तानि तेषां रागा निर्दिष्टाश्च सन्ति ।

लोकोक्तयः सूक्तयश्च

नूनं कविरयं सूक्तिसम्राडिति वक्तुं युज्यते । सूक्तिप्रयोगेण कवयितुर्वक्तव्ये प्रभविष्णुता संवर्द्धिता । अथ क्रियतां कासाञ्चन सूक्तीनां रसास्वादः—

क्षणं न सौख्यं खलु विद्यते मनाक्
अपात्रपात्रीकृतकन्यकस्य हि ।। १.७
भवत्यवश्यं भवितव्यमेव यत् ।। १.८
गतचिन्तनं वृथा । १.९
अज्ञेष्ववज्ञोपहतेषु शत्रुषु
स्त्रीजातिषु ज्ञातिषु जन्मवैरिषु
नावेद्यते दुःखमरुन्तुदं क्वचित्
निवेदितं मन्दफलाय वर्त्तते ।। १.४७
शान्तस्वभावेन पतङ्गसन्ततेः
पक्षो हि दक्षोऽग्निपातकर्मणि ।। १.५८

अत्युन्नते सत्कुलसम्भवे हि
सिन्धूयते विन्दुमितोऽपि दोषः ।
दोधूयमानो ज्वलनः सुशीतलो
नीहारसेकेन कथं भविष्यति ॥ १.६४
दुर्दैवदन्धस्य जनस्य कर्णयोः
शूलप्रदोच्चैरुपदेशभारती ।
शान्त्यै न वा शीतलतोपसेचनं
चूर्णेषु तूर्णानलदीपनाय वै ॥ १.६५
अमर्षवातेन हि गर्वपर्वतो—
परिस्थितस्य स्खलनं न दुर्लभम् ॥ १.६७
स्वल्पा शशाङ्कस्य कलङ्करेखा
न गोचरी कस्य जनस्य जाता ॥ १.६८
क्रोधे क्रोधो भये भीतिः शोके शोकोऽसुखेऽसुखम्
प्राप्य द्वैगुण्यमेतानि स्वजनाग्रे चकासति ॥ २.२८
क्रोधोन्मत्ते च मत्ते च दर्पदाहज्वरे तथा ।
उपदेशो हि दोषाय तस्मात्तं परिवर्जयेत् ॥ २.३५
महामोहैकमूलस्य दुरन्तफलदायिनः ।
का चिकित्सास्य गर्वाख्यरोगस्य बत विद्यते ॥ २.३६
दर्पाशीविषदष्टानामुपदेशमहौषधम् ।
न गृह्णतां दुर्मतीनायुरायासकारणम् ॥ २.३७
कृशानुर्जातु किं याति पतङ्गं प्रति तेजसा ॥ २.४२
पयोधराज्जलौकास्ये रक्तं स्रवति नेतरत् ॥ २.६२
वर्षाविलेषु सलिलेषु सुखभिषेको—
भेकस्य वै जनयति प्रमदातिरेकम् ।
योग्येन योग्यमनुयोजयिता विधाता
नीचात्मनामभिरतिं विदधे हि नीचे ॥ ३ १८
आचारसाम्यमनुयाति हि नामसाम्यम् ॥ ३.३१
किं सर्वतः प्रियमथाप्रियमस्ति लोके
काको हि निम्बफलमत्ति समादरेण ॥ ३.३७
क्रुद्धे मत्ते तथोन्मत्ते दर्पिते चाल्पचेतसि ।
उपेक्षैव चिकित्सा स्यान्महतां दूरदर्शिनाम् ॥ ४.५१
अयुक्तं क्रियते यत्तु क्रियतां तेन किं मम ॥

अविचार्यचरित्रा हि वृद्धा भर्द्दैरनादृताः ॥ ८.२८
निर्दोषाप्यबला बाला भर्तृदोषेण दुष्यति ।
पयःफेननिभा शय्या त्याज्या मत्कुणसङ्गिनी ॥ ८.६३
काकोलस्य क्व दारुण्यमसेर्वा तीक्ष्णता क्व च ।
केषां दुर्जनदुर्वाक्यात् दुःसहक्लेशदायिता ॥ ८.६५
कदाचिन्नार्हति श्रोतुं पतिनिन्दां पतिव्रता ।
कैरप्यतो न कार्या तत्सन्निधौ स्वामिगर्हणा ॥ ८.६८
मत्तो मोहान्ध उन्मत्तः कार्ये तुल्यास्त्रयस्त्विमे ।
यन्निषिद्धं प्रयत्नेन तत् कुर्वन्ति पुनः पुनः ॥ ८.८३
स्वरुचेरनुगा बुद्धिः रुचिः कर्मानुसारिणी ।
कर्मायत्तं फलं लोकः स्वकर्मफलभुग्भवेत् ॥ ८.८४
विषायन्ते सेवाः स्वजनविहिता यत्नसहिता—
स्तृणायन्ते प्राणा इति च वरयोषिद्विरहतः ॥ ६.३
तद्भावि यत्तु भवनीयमवश्यमेव
मिथ्या हि भाति भुवने पुरुषप्रयत्नः ॥ १०.२७

स्तोत्रगीतानि

दक्षयज्ञमहाकाव्ये स्तोत्राण्यनुत्तमस्थानं भजन्ते । शिवभक्तेन कविना स्वस्तोत्राणि समीचीनपरिवेशे ग्रथितुमेवेदं महाकाव्यं प्रणीतमित्यस्माकं मतम् । स्तोत्र-गानानां रागा निर्दिष्टाः । तेषां पदावली छन्दांसि च गानाय सविशेषमुपयुक्तानि । विषयानुरूपा पदावली स्तोत्रेषु सन्निवेशिता । सप्तमसर्गे सत्या दशरूपेषु यदि कमला—
'विकचकमलकुलकलिकोपरिहरिदयितालम्बितवेशा'स्ति तद्धि धूमावती तु—

उच्चैर्घोणा कोटरनयना दीना विधवावेशा ।
करधृतसूर्पा समधिकदर्पा काकध्वजरथवासा ॥

अत्र विष्णुशिवसतीस्तुतयः सविशेषमहत्त्वं भजन्ते ।

स्तोत्रातिरिक्तं तृतीयसर्गे प्रावृड्वर्णनस्य गीततत्त्वानि समुल्लेखार्हाणि सन्ति । अस्मिन् प्रसङ्गे कविराह—

वैतालिका विमलमङ्गलगीतिकाभिः
प्रावृट् समागमविबोधविधायिनीभिः ॥ ३.१

अत्र कालिदासस्य ऋतुसंहारानुरूपा गीतात्मकता विद्यते ।

गीततत्त्वदृष्टचा नवमसर्गे षष्ठश्लोकात् त्रयोदशश्लोकं यावत् पद्यानि महत्त्वपूर्णानि सन्ति। अत्र शिवः स्वमनसैवालपति । यथा–

न निर्ग्राह्यं कैश्चिन्न च हृदय-वार्यं द्रुतगतौ
पटीयस्त्वं भ्रातर्न तव पथि पाथेयपरता ।
न वापेक्ष्यः सार्थस्तव न परतन्त्रत्व जडिमा
न गत्वा स्वात्मानं कथय कथमङ्ग व्यथयसि ।। ९.३

एतेषु श्लोकेषु गीतिकाव्यस्य सर्वोच्चतत्त्वानि प्रस्फुटितानीति निश्चप्रचम् ।

जैनबौद्धयोः कतिपयपारिभाषिकशब्दानां तुलनात्मकविवेचनम्

हरीन्द्रभूषण जैनः

जैनबौद्धग्रन्थेषु बहव ईदृशाः पारिभाषिकशब्दाः सन्ति येषामर्थाः प्रायः समानाः। केवलं सुत्तपिटकस्य मज्झिमनिकये जैनाचारतत्त्वज्ञानविषयकाणां द्विषष्टिप्रमितानामधोलिखितानाँ शब्दानामुल्लेखो वर्तते—

"ज्ञान- दर्शन- क्रोध- राग- द्वेष- मोह- देव- मार- श्रमण- मुनि जिनाचेलक- ध्यान- प्रजा- तप- पुण्य- पाप- निदानर्द्धि- निर्वाण- ब्रह्मचर्य- तृष्णा- वेदना- संज्ञा- शील- समाधि- समाचारेन्द्रिय- संयम- त्याग- सर्वज्ञार्हन्- नरक- स्वर्ग- चक्रवर्ति- शल्यापरिग्रह- दुःखात्मवादानात्मवाद- धर्मास्रव- संवर- भावना- वीचारं- वितर्क- निर्ग्रन्थ- सम्यग्दृष्टि- योन्यण्डजौपपातिक- जरायुज- मोक्षेर्या- केवली- गति-गुप्ति- पुद्गल- विमुक्ति- गंधकुटी- देवनिकाय- संस्थानानि।"[1] इति

त्रिपिटकं द्वादशाङ्गञ्च

बौद्धानां मूलागमा त्रिपिटकमिति यद्यपि प्रसिद्धं तथापि तेषां द्वादशाङ्गशब्देनाप्युल्लेखः प्राप्यते। बुद्धवचनानां द्वादशप्रवचनरूपेण विभागो महायानबौद्धधर्मस्य संस्कृतग्रन्थेषु प्राप्यते। हरिभद्रस्याभिसमयालङ्कारस्यालोकटीकायां बुद्धवचनानां द्वादशाङ्गशब्देनैवमुल्लेखो विद्यते—

'सूत्रं ज्ञेयं व्याकरणं गाथो दानावदानकम्।
इतिवुत्तकं निदानं वैपुल्यं च सजातकम्।'
उपदेशाद्भुतौ धर्मौ द्वादशाङ्गमिदं वचः।"[2]

---

१ जोधपुरतः प्रकाशिते 'मरुधरकेसरी-अभिनन्दनग्रन्थे' डॉ० परमेष्ठीदासजैनस्य 'मज्झिमनिकाये समुपलब्धा जैनशब्दावली' निबन्धः, पृ. ५.१८३

२ भरतसिंह-उपाध्यायः, 'पालिसाहित्य का इतिहास' पृ. ११३ तमस्य पादटिप्पण्यामुद्धृतम्!

जैनधर्मस्य मूलागमा अङ्गमिति शब्देनाभिहिताः। ते च द्वादश—आचाराङ्ग- सूत्रकृताङ्ग- समवायाङ्ग- व्याख्याप्रज्ञप्ति- ज्ञातृधर्मकथाङ्गोपासकदशाङ्गान्तःकृद्दशाङ्गानुत्तरौपयातिकदशाङ्ग - प्रश्नव्याकरणाङ्ग - विपाकश्रुताङ्ग - दृष्टिवादाङ्गानि।[3] इति

एवमेव जैनागमस्य पिटकशब्देनाप्युल्लेखो वर्तते। समवायाङ्गेऽङ्गशास्त्रस्य गणिपिटकशब्देनोल्लेखः कृतः। टीकाकाराभयदेवानुसारं गणिनामाचार्याणां पिटको धर्मरूपनिधेः पात्रम्।[4] इति

सम्यग्दृष्टिर्मिथ्यादृष्टिश्च

मज्झिमनिकायस्य सम्मादिट्ठिसुत्तन्ते सम्यग्दृष्टेर्वर्णनं वर्तते। "आर्यश्रावकः सम्यग्दृष्टिर्भवति। तस्य दृष्टिः सरला वर्तते। सोऽत्यन्तं श्रद्धावान् भवति सद्धर्मञ्च प्राप्नोति। आर्यश्रावकः कुशलं कुशलमूलञ्च जानाति। सोऽकुशलमकुशलमूलञ्च जानाति। एतेनार्यश्रावकः सम्यग्दृष्टिर्भवति।"[5] इति

अत्राकुशलस्य दश भेदा अकुशलमूलस्य च त्रयः। प्राणातिपातादत्तादान- काममिथ्याचार- मृषावाद - परुषवचन- संप्रलापाभिध्या- व्यापाद - मिथ्यादृष्टय इति दशाकुशलानि। लोभद्वेषमोहाः त्रीण्यकुशलमूलानि।

जैनधर्मानुसारं जीवाजीवास्रव- बन्ध- संवर - निर्जरा - मोक्षा इति सप्ततत्त्वानां यथार्थश्रद्धानं सम्यग्दर्शनं भवति।[6] सम्यग्दर्शनेन सम्पन्नश्च सम्यग्दृष्टिः कथ्यते। सम्यग्दृष्टेः कर्मणां निर्जरा सततं भवत्येव।[7]

सम्यक्शब्दस्य विवेचनम्

बौद्धधर्मे निर्वाणप्राप्तेर्योऽष्टाङ्गिको मार्गस्तत्र प्रत्येकशः सम्यक्शब्दः प्रयुक्तः — सम्यग्दृष्टिः, सम्यक्संकल्प इत्यादि।[8] जैनधर्मे रत्नत्रयरूपेण यो मोक्षमार्गोऽभिहितस्तत्रापि प्रत्येकशः सम्यक्शब्दः — "सम्यग्दर्शनज्ञानचारित्राणि

---

३ नन्दीसूत्रम् ४४।

४ समवायाङ्गम् १३६, (अभयदेववृत्तिः, पृ. १०० अ)

५ मज्झिमनिकायः, १.१.९

६ तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्, तत्त्वार्थसूत्रम्, १.२

७ सम्यग्दृष्टिश्रावक......क्रमशोऽसंख्येयगुणनिर्जराः। तदेव १.४

८ अभिधम्मपिटकम् २.११। मज्झिमनिकायस्य (१.१.१०) सतिपट्ठानसुत्तम्

मोक्षमार्गः"[9] उभयत्रापि सम्यग्शब्दस्य यथार्थमित्य ।[10] वस्तुतः सम्यक्त्वं बौद्धजैनसाधनयोरभिन्नमङ्गम् ।

सम्यग्दर्शनस्य विपर्ययो मिथ्यादर्शनम् । जैनधर्मानुसारं मिथ्यादर्शनं कर्मबन्धस्य कारणम् ।[11] मिथ्यादर्शनेन युक्ता मिथ्यादृष्टिः । बौद्धदर्शनानुसारं मिथ्यादृष्टेरर्थो मिथ्याधारणेति । दीघनिकायस्य ब्रह्मजालसुत्ते द्विषष्टिप्रथितानां मिथ्यादृष्टीनां वर्णनं वर्तते । तत्राष्टादश मिथ्याधारणा जीवनस्य जगतश्च प्रारम्भ-विषये शेषाश्च तयोर्विनाशविषये समूहिताः ।

पुद्गलः

पुद्गलशब्दः (पालिभाषायां पुग्गलः) बौद्धपिटकेषु अनेकशः प्रयुक्तः । यथा— दीघनिकाये (१.२०६), मज्झिमनिकाये (३.५८), संजुत्तनिकाये (१.९३), अंगुत्तरनिकाये (१.८.१९७), सुत्तनिपाते (५४४.६८५), धम्मपदे (३४४), पटिसंभिदामग्गे (१.१८०), पेतवत्थुनि (२.३), विमानवत्थुनि (८६), विसुद्धिमग्गे (४०९) च ।[12]

अभिधानप्पदीपिकानामके पालिशब्दकोशे पुद्गलशब्दस्याधोलिखिता अर्था विद्यन्ते—

पाणो सरीरि भूतं वा सतो देही च पुग्गलो ।
जीवो पाणि पजा जन्तु जनो लोको तथागतो ॥

विसुद्धिमग्गे पुग्गलशब्दस्येदृशी निरुक्तिः कृता—

"पुं त्ति वुच्चति निरयो तस्मि गलन्तीति पुग्गला" इति

पिटकेषु पुद्गलशब्दस्य जीवो व्यक्तिः पुरुषश्चेत्यर्थाः । पश्चाद्भाविनि बौद्ध-दर्शनसाहित्ये पुद्गलस्यात्मेत्यर्थोऽपि दृश्यते ।[13] अभिधम्मपिटकस्य 'पुग्गल पञ्जत्ति' नामक एकोग्रन्थस्तत्र नानाव्यक्तीनां वर्णनं विद्यते । जातकसाहित्येऽपि पुद्गलशब्दस्य व्यक्तिरेवार्थः—

---

९ तत्त्वार्थसूत्रम् – १.१

१० तत्त्वार्थसूत्रस्य १/१ सूत्रस्य सर्वार्थसिद्धिटीका ।

११ मिथ्यादर्शनाविरतिप्रसादकषाययोगा बन्धहेतवः । तत्त्वार्थसूत्रम् ८.१

१२ 'पालि-इंगलिश - डिक्शनरी' संपादकौ रीज-डेविड–विलियम - स्टीड महोदयौ । पृ. ८५

१३ तदेव, पृ. ८५

"भो वानरिन्द, इमस्मिं लोके चतूहि धम्मेहि समन्नागतो पुग्गलो पच्चामित्ते अभिभवति ।" (वानरिन्दजातके)

जैनागमे पुद्गलशब्दस्य सूक्ष्मा व्याख्या सन्धारिता । तदनुसारं पुद्गल एकमजीवद्रव्यम् यद् रूपस्पर्शरसगन्धवर्णवद् भवति । तस्य संख्यातासंख्याता इत्यनन्तप्रदेशाः सन्ति । शरीरवाङ्मनः प्राणापानास्तस्य कार्याणि । पुद्गलाः शब्दबन्धसौक्ष्म्यस्थौल्यभेदतमश्छायातपोद्योतवन्तश्च भवन्ति । तस्य द्वौ भेदौ-अणुः स्कन्धश्च । भेदेनाणोरुत्पत्तिः स्कन्धस्य च भेदसंघाताभ्याम् । पुद्गले स्निग्धत्वं रूक्षत्वं च स्तः । अत एव तत्र निरन्तरं बन्धः ।[14]

यद्यपि पुद्गलशब्दस्य त्रिपिटके जैनागमे च परस्परं विभिन्नोऽर्थः परं भगवतीदशवैकालिकयोः प्राचीनभागेषु तत्र बौद्धपिटके गृहीतोऽप्यर्थो वर्तते । भगवत्यां (८–१०–३६१) गौतमप्रश्नानन्तरं महावीर उत्तरं वदति—"जीवः पोग्गली पोग्गलश्च" । एवं भगवत्यामेव (२०–२) जीवतत्त्वस्य पर्यायरूपेणापि पुद्गलस्य प्रयोगो दृश्यते । दशवैकालिके (५–१–७३) पुद्गलो मांसार्थेऽपि प्रयुक्तो ।

आस्रवसंवरौ

आस्रवः (पालिभाषायाम् आसवो) संवरश्चेति शब्दावुभौ परस्परविरुद्धार्थकौ पिटकजैनागमयोः समान एवार्थे प्रयुक्तौ स्तः । मज्झिमनिकाये (१.१.२) आस्रवनिरोधकेष्वुपायेषु मनोवाक्कायक्रियायाः सुव्यवस्थितकरणं पठ्यते । तद्यथा—यन्मनोवाक्कायानां या क्रिया सास्रवः ।

अभिधम्मपिटकस्य धम्मसंगणि नामके प्रथमे ग्रन्थे एक 'आस्रववर्गो' विद्यते यत्र आस्रव-सास्रवानास्रवास्रवसंप्रयुक्तास्रवविप्रयुक्तप्रभृतेर्वर्णनं विद्यते । अत्र मनसः प्राधान्यं स्वीकृत्य मनोऽविशुद्धतैवास्रवोऽङ्गीकृतः ।

तत्त्वार्थसूत्रस्य षष्ठाध्याये आस्रवतत्त्वस्य वर्णनं विद्यते—कायवाङ्मनः कर्मयोगः, स आस्रवः (तत्त्वार्थसूत्र ६.१–२) । अस्य द्वौ भेदौ पुण्यास्रवः पापास्रवश्च । शुभकार्याणि पुण्यास्रवस्य अशुभकार्याणि च पापास्रवस्य कारणम् । (शुभः पुण्यस्याशुभः पापस्य (तत्त्वा० ६.३)

संवर आस्रवस्य विरोधी । पिटकानुसारं संवरस्यार्थः संयमो नियन्त्रणं वा । यो भिक्षुः स्वेन्द्रियैर्मनोवाक्कायैश्च संवृतः स सर्वदुःखेभ्यः प्रमुच्यते इति धम्मपदानुसारम्—

———————

१४ तत्त्वार्थसूत्रम् ५.१ – ३३

चक्खुना संवरो साधु साधु सोतेंन संवरो ।
घाणेन संवरो साधु साधु जिह्वाय संवरो ॥
कायेन संवरो साधु साधु वाचाय संवरो ।
मनसा संवरो साधु साधु सव्वत्थ संवरो ॥
सव्वत्थ संवुतो भिक्खू सव्वदुक्खा पमुच्चति । भिक्खुवग्गो १-२

जैनदर्शन आस्रवनिरोधः संवर इति प्रोक्तः (आस्रवनिरोधः संवरः–तत्त्वार्थसूत्र ९ १) । अर्थात् मनोवाक्कायक्रियाणां यथा सम्भवं नियन्त्रणं संवरः ।

भावना

विसुद्धिमग्गस्य समाधिस्कन्ध इति नवमः परिच्छेदो 'ब्रह्मविहारनिद्देसो-नाम । अत्र चतस्रो भावना, मैत्री–करुणा–मुदितोपेक्षेति निर्दिष्टाः । एता एव चत्वारो ब्रह्मविहाराः सन्ति । मज्झिमनिकायस्य (४.४०) महायमक-वग्गस्य अस्सपुरसुत्तन्तेऽपि एताश्चतस्रो भावनाः सविशेषं वर्णिताः ।

जैनदर्शने व्रतपालनप्रकरणे भावनीयासु भावनासु चतस्रो भावना महत्त्व-पूर्णा—मैत्री–प्रमोद–कारुण्य–माध्यस्थ्यरूपा इति ।[15] एवमुभयदर्शनयोर्भावनानां स्वरूपं समानमेव केवलं प्रमोदमाध्यस्थ्य–स्थाने बौद्धदर्शने मुदितोपेक्षे वर्तेते ।

योनिजन्मनी

मज्झिमनिकाये (१.२.२) योनेश्चत्वारो भेदाः—अण्डज-जरायुज-स्वेदजौपपातिका इति । जैनदर्शने ये जन्मभेदास्तेषामुपर्युक्तयोनिभेदैः साम्यं प्रतिभाति ।

जैनदर्शनानुसारं जन्मतः त्रैविध्यं सम्मूर्च्छनं, गर्भ उपपादश्चेति । जरा-युजाण्डजपोतप्राणिनां गर्भजन्म, देवनारकाणामुपपादजन्म शेषप्राणिनाञ्च सम्मूर्च्छन-जन्म भवति । एवमण्डजजरायुजयोनी गर्भजन्मनि स्वेदजयोनिः सम्मूर्च्छन-जन्मन्यौपपातिकयोनिश्चोपपादजन्मन्यन्तर्भवति ।[16]

जिनो वीरश्च

जयन्ति कर्मशत्रून् ये ते जिनाः । जिना देवता येषान्ते जैनास्तेषां धर्मो जैनधर्मः । जिनवीरशब्दौ मूलतो भगवते महावीरायान्येभ्यश्च पूर्व-

---

१५ तत्त्वार्थसूत्र, ७.११

१६ तदेव, २.३१ – ३५

कालिकजैनमहात्मभ्यः प्रयुक्तौ। तौ पालिसाहित्ये महात्मनो बुद्धस्य विशेषणं सञ्जातौ। बुद्धेन स्वयमेव कथितम —'मया सर्वे पापा जिता अतएव जिनोऽहम्' (मज्झिमनिकाये, महाअस्सपुरसुत्तन्ते १.४.६)

एवं वीरशब्दस्यापि प्रयोगो भगवते बुद्धाय नैकशः कृतः। महाप्रजापती गोतमी बुद्धस्य वन्दनावसरे कथितवती 'बुद्ध वीर नमोत्यत्थु' इति (थेरीगाथा-१५७)

पालिसाहित्ये 'जिनालङ्कार' – 'जिनचरित' नामनी द्वे काव्ये स्तः।[17] अमरकोशे जिनशब्दो बुद्धस्य पर्याय इति निर्दिष्टम्—

"सर्वज्ञः सुगतो बुद्धो.....................मारजिल्लोकजिज्जिनः"

अर्हन्नरिहन्तश्च

भिक्षुलक्षणं लक्षयता बुद्धेन कथितं–भिक्षुः श्रमणोऽपि कथ्यतेऽर्हंश्च' (महाअस्सपुरसुत्तन्ते-मज्झिमनिकाये १.४.६) पुद्गलप्रज्ञप्तेस्तृतीये वर्गेऽर्हतो लक्षणं विद्यते–'एष कामवासनाया भववासनायाश्चासक्तिभ्यां विमुक्तः', एतेन कथितं यदर्हतः पुनर्जन्म नास्ति। धम्मपदस्य सप्तमो वर्गोऽर्हन्तवग्गो नाम। अत्र दश गाथा सन्ति। तदनुसारं ये सर्वग्रन्थप्रहीणाः, सन्निचयरहिताः, परिज्ञात-भोजना, मोक्षगोचराः, परिक्षीणास्रवाः, शान्तेन्द्रियाः, शान्तमनोवाक्कायकर्माण-स्तेऽर्हन्तः। यत्रैवंभूता अर्हन्तो विहरन्ति सा भूमी रमणीया। तथाहि–

'यत्थारहन्तो विहरन्ति तं भूमिं रामणेय्यकं' (धम्मपद ७.६)

बौद्धग्रन्थानामर्हन् जैनागमस्यारिहन्तेन समान एव।

सावगोपासगौ

उपर्युक्तौ द्वावेव शब्दौ यस्मिन् कस्मिन्नपि रूपे पिटके (दीघनिकाये ४) जैनागमे च पूर्वत एव प्रचलितौ। यद्यपि बौद्धपरम्परायां सावग-शब्दस्यार्थो' बुद्धस्य साक्षात् भिक्षुः शिष्यः' एव (मज्झिमनिकाय ३) परं जैनपरम्परायां स उवासगशब्द इव गृहस्थधर्मानुयायीति व्यनक्ति।

अगारादनगारः

कश्चिद् पुरुषो गृहस्थाश्रमं त्यक्त्वा भिक्षुर्भवति तदर्थं यद् वाक्यं रूढं वर्तते तत् पिटके जैनागमे च प्रायः समानमेव। तदिदं वाक्यम्–अगारस्मा अनगारियं पव्वज्जन्ति' (महावग्ग)–'अगाराओ अणगारियं पव्वइत्तए' इति (भगवती ११.१२.४३१)।[18]

---

१७ 'पालिसाहित्य का इतिहास' पृ. ६३१ – ६३५

१८ 'चार तीर्थङ्कर', पं. सुखलाल-संघवी, पृ. १४१

संन्यासः कर्मयोगश्च

राधावल्लभः त्रिपाठी

मानवः श्रमेण सर्वोच्चं सुखं साधयितुमिच्छति न तु पशुरिति तयोरन्तरम्। मानवस्य श्रमश्चतुर्विधः — अध्ययनात्मकः सर्जनात्मकः तपस्यात्मको योगात्मकश्च। मानवस्येमाश्चतस्रः श्रमप्रवृत्तीरधिकृत्य भारतीयविचारकैर्जीवनस्य चत्वारो भागाः कृताः। इमे भागा एव चत्वार आश्रमाः।

सामान्यतो वानप्रस्थानन्तरं जीवनस्य चतुर्थे भागे पुरा संन्यासाश्रमे प्रवेशोऽभवत्। तद्यथा मनुराह—

वनेषु च विहृत्यैवं तृतीयं भागमायुषः।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत्। (६.३३)

किन्तु बहवो जना अपवादरूपेण ब्रह्मचर्याश्रमं गृहस्थाश्रमं वा समाप्यैव संन्यासाश्रमं स्वीकृतवन्तः। तद्यथा—

'ब्रह्मचर्यं समाप्य गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्।" (जाबालोपनिषत्, ४)

संन्यासाश्रमस्य भूमिका

ब्रह्मचर्याश्रमे ज्ञानमर्जयित्वा गृहस्थाश्रमे सन्ततिमुत्पाद्य ऋणेभ्य आत्मानं विमोच्य मानवो वानप्रस्थाश्रमे तपोमयवृत्त्या ब्रह्मसंस्थो भवितुं प्रायतत। ब्रह्मोपलब्धिर्वानप्रस्थाश्रमस्य चरमं लक्ष्यमासीत्। अथ वानप्रस्थानन्तरं संन्यासस्या स्वीकरणे को हेतुरिति विमर्शार्हः प्रश्नः।

वानप्रस्थाश्रमे सम्पादितानि तपोमननचिन्तनादीनि हि ब्रह्मज्ञानस्य साधनानि सन्ति। ब्रह्मज्ञानप्राप्तेरनन्तरमेतेषां साधनानां स्वल्प एवोपयोगो वर्त्तते। वानप्रस्थसाधनाया अवधिर्यदा समाप्तिमेति ततः संन्यास आरभते। वानप्रस्थस्य कृते पञ्चमहायज्ञादिसम्पादनं, तपोवृत्तिः पर्णकुटीरनिवासश्चेत्यादीनि विधानानि निर्दिष्टानि किन्तु संन्यासकाले पुरुष एतेषामपि परित्यागं कृत्वा ब्रह्मसंस्थ एव ब्रह्मवदाचरति स्म। ब्रह्मसंस्थं जनं स्थान-परिवार-देश-कुल-धर्म-व्यवसायादिसङ्कुचितसीमाभ्य उत्थापयितुं संन्यासाश्रमः परिकल्पितः।

संन्यासी समस्तजागतिकप्रपञ्चेभ्यो विमुक्तः स्वव्यक्तित्वस्यानन्त्यमनुभवति स्म । अतः संन्यासाश्रम-विधानं सर्वथा समीचीनमेव ।

प्रारम्भिकयुगे वानप्रस्थाश्रमः संन्यासाश्रमश्च सम्मिश्रितावनिर्भिन्नौ चास्तामित्यनुमीयते विद्वद्भिः ।[1] गरुडपुराण उक्तम् —

तपसा कर्शितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
संन्यासी स हि विज्ञेयो वानप्रस्थाश्रमे स्थितः । (४९.१)

तपसः समाप्तेरनन्तरं केचन मुनय आश्रम एवोषितवन्तः । रामायण-महाभारतादिषूल्लिखिता वसिष्ठागस्त्यविश्वामित्रादयस्तादृशा एव मुनयः ।

परवर्त्तियुगे वानप्रस्थाश्रमस्योपेक्षा दृश्यते । ब्रह्मचारिणो गृहस्थाश्च स्वल्पकालं यावत् वानप्रस्थाश्रमे दीक्षिताः सन्तः पश्चात् संन्यासं समाश्रयन्ते स्म । केचन वानप्रस्थाश्रमं सर्वथा परिहृतवन्तः ।[2]

संन्यासिनः बहूनि नामान्तराण्यपि धर्मशास्त्रेषूपलभ्यन्ते । वसिष्ठेन संन्यासिनः यतिरित्यभिधानमुल्लिखितम् ।[3] अन्यैर्धर्मशास्त्रकारैस्तदर्थं परिव्राजक-भिक्षु-मुनय इति शब्दाः प्रयुक्ताः ।[4] मुनिरित्युपाधिर्वानप्रस्थसंन्यासिनोरुभयोरपि कृते प्रयुक्तः ।[5]

संन्यासिनो जीवनवृत्तिः

संन्यासिनो जीवनचर्या गृहस्थवानप्रस्थयोर्जीवनचर्यातः भिन्नैव वर्त्तते । संन्यासी तु गृह-सुख-सुरक्षादिविषये सर्वथा पराङ्मुखो लोकपरलोकविषये निश्चिन्तश्चंक्रमणमेव केवलं कुरुते स्म । तस्य किमपि करणीयं नासीत् । आध्यात्मिकचिन्तनमेव तस्यैकमात्रं व्यापृतिरभवत् । संन्यासिनो जीवनवृत्ति-विवेचनमधः प्रस्तूयते ।

आहारः

संन्यासी भैक्ष्यचर्येणाशनीयं लभते स्म । केवलं भिक्षाप्राप्तय एव

---

१ डा. रामजी उपाध्याः–प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका पृ. ३२८

२ तत्रैव ।

३ वसिष्ठधर्मसूत्राणि ११.३४

४ History of Dharmaśāstra , P. V. Kane, P. 417

५ मनुस्मृतिः ६.२५, ६.४१, ६.४३

ग्रामे तस्य प्रवेशोऽभूत् । स पादपेभ्यो भोजनार्थं फलमूलादीनि नैव लुनाति स्म । यानि फलपत्राणि स्वभावतो वृक्षादिभ्यो ऽपतंस्तान्येव सोऽगृह्लणात् ।[6]

संन्यासिनो भैक्ष्यचर्याविषये नियमा निर्दिष्टा आसन् । तद्यथा मनुः —

न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ ६.५०
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।
आकीर्णं भिक्षुकैर्वान्यैरगारमुपसंव्रजेत् ॥ ६.५१
एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥ ६.५५
विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥ ६.५६
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥ ६.५७

भागवतपुराणानुसारं संन्यासी अह्नि वा रात्रौ वा यदा कदचित् प्राप्तमाहारमश्नाति । तस्याहारस्य मात्रा यथावसरं समधिका अल्पीयसी वा भवेत् । संन्यासी कदाचिन्नीरसनिर्गुणं कदाचिच्च स्वादिष्ठमधुरमाहारं भुंक्ते ।[7] भागवतकारः कथयति–

भिक्षां चतुर्षु वर्णेषु विगर्ह्यान् वर्जयंश्चरेत् ।
सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता ॥ ११.१८.१८
बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः ।
विभज्य पावितं शेषं भुञ्जीताशेषमाहृतम् ॥ ११.१८.१९
वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ।
संसिध्यत्याश्वसम्मोहः शुद्धसत्त्वः शिलान्धसा ॥ ११.१८.२५

परिधानादीनि

संन्यासिनः परिधानविषये निर्दिशति मनुः —

कपालं फलमूलानि कुचेलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥ (३.४४)

संन्यासी जीर्णपुराणवासांसि परिदधाति स्माहोस्विद् दिगम्बर एव सञ्चरति

---

६ गौतमधर्मसूत्राणि ३.११ – २३
७ भागवते ७.१३ (दत्तात्रेयस्यात्मकथातः)

स्म ।[8] भागवतपुराणानुसारं स कदाचिन्महार्होत्तमदुकूलादीनि धारयति स्म क्वचिन्मृगचर्मणा चीवरेण वल्कलेनैव वा शरीरमावृणोति स्म ।[9] गौतमानुसारं स मुण्डितशिरस्कोऽथवा बद्धजटाजूटोऽभवत् ।[10] मनुः संन्यासिनः पात्राणीत्थं वर्णयति—

अतैजसानि पात्राणि यस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥ ६.५३
अलाबुं दारुपात्रं च मृण्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥ ६.५४

वस्त्रधारणं साधारणतस्संन्यासिनो नासीदनिवार्यं तथापि यदि वस्त्राणि धारयितव्यान्येव स्युस्तर्हि कौपीनमात्रमेव स परिदधाति स्म ।

संन्यासी निरन्तरं चरन्नेव कालं यापयति स्म । गौतमानुसारं कस्मिन् स्थाने एकामेव क्षपां सोऽगमयत् । किन्तु प्रावृषि तस्य चंक्रमणं स्थगितमभवत् ।[11] महाभारतानुसारं संन्यासी निवासाय वृक्ष सरित्तटं शून्यगृहं वा समाश्रयते स्म ।[12] कुटीचकसंन्यासी पर्णशालायामवसत् । भागवतानुसारं संन्यासी क्वचित् पत्तने वा वने वा वसति क्वचिद् राजप्रासादे वा । शयनायासौ क्वचित् तृण-पत्रादिभिर्निर्मितां शय्यामाश्रयते, क्वचिद्वा मृदुसंस्तरालङ्कृतं प्रासादपर्यङ्कम् ।[13]

संन्यासिनो जीवनचर्या, आचारो व्यवहारश्च

एकान्तवासेनाल्पाहारेण च संन्यासी आत्मवशोऽभवत् । संन्यासिन आचार-मित्थं मनुना निर्दिष्टम्—

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ ६.४६
अतिवादांस्तितिक्षेत नावमन्येत कंचन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ६.४७

---

८ आपस्तम्बधर्मसूत्राणि २.९.१३
९ भागवते ७.१३
१० गौतम ध० सू० ३.११.२३
११ गौतम ३.११.२३
१२ अनुशासन प० १४१.८०-९०
१३ भागवते ७.१३

क्रुद्धयन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ ६.४८
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ ६.४९
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥ ६.५७
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बद्धयते ॥ ६.५८
अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥ ६.५९
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥ ६.६०

मनुः संन्यासिनः कृते योगस्य महत्त्वमङ्गीकरोति—

अह्ना रात्र्या च याञ्जन्तून्हिनस्त्यज्ञानतो यतिः ।
तेषाँ स्नात्वा विशुद्धयर्थं प्राणायामान् षडाचरेत् ॥ ६.६९
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ ६.७०
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ ६.७१
प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ६.७२
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ।
ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः ॥ ६.७३

श्रीमद्भागवतेऽपि संन्यासिनः योगसाधनाया अनिवार्यता प्रमाणिता—

यदारम्भेषु निर्विण्णो विरक्तः संयतेन्द्रियः ।
अभ्यासेनात्मनो योगी धारयेत् चञ्चलं मनः ॥

(भाग ११.२०.१८)

महाभारतानुसारं संन्यासिनश्चतुर्विधाः –कुटीचक–बहूदक–हंस–परमहंस–भेदात् । कुटीचकः कुट्यां वसति स्म । बहूदकः प्रायशस्तीर्थयात्रार्थमटति स्म । हंस आश्रमधर्ममपालयत् । परमहंसस्तु निस्त्रैगुण्यः सर्वविधजागतिक-प्रपंचेभ्यो विमुक्तो ब्रह्मसंस्थोऽभूत् । ये संन्यासिनो वानप्रस्थमस्वीकृत्यैव संन्यासे दीक्षितास्ते वानप्रस्थमुनीनां निवेशनेषु भैक्ष्यचर्यमचरन् ।

संन्यासी शिशुरिव विगतस्पृहो वीतरागलोभमत्सरो नितान्तनिश्छलनिर्मलान्तःकरणोऽभवत् । महाभारतयुगे केचन संन्यासिनो जडवद् व्यवहरन्तोऽपि तत्त्वज्ञा मेधाविनो नित्यतृप्ताश्चासन् । जगतीतलं प्रकृत्याः क्रीडाक्षेत्रं मन्यमानास्ते तद्गतवैषम्यैर्लेशमात्रमपि प्रभाविता न बभूवुः । संसारगता विषमता सर्वथा स्वाभाविकी सर्वं च जगन्नश्वरमित्यवितथा तेषां बभूव धारणा । एते संन्यासिनो जगद्विषये निश्चिन्ता विषयेभ्यो विरता आत्मन्येवामन्दानन्दमनुभवन्तः सततं सन्तुष्टा लोके विचरन्ति स्म । महाभारते एते आजगरवृत्तय इति वर्णिताः ।[14] भागवते वर्णित ऋषभदेवोऽप्याजगरवृत्तिकः संन्यासी बभूव । स शयान एवाशनपानादिकं समपादयदतः सामान्यजनास्तस्माज्जुगुप्सिरे ।[15]

पद्मपुराण आचारदृष्ट्या त्रिविधाः संन्यासिनः परिगणिताः—ज्ञानसंन्यासी, कर्मसंन्यासी, वेदसंन्यासी च । ज्ञानसंन्यासी सर्वथा मुक्तो निर्द्वन्द्वो निर्भय आत्मन्येव रतोऽभूत् । वेदसंन्यासी त्वकामोऽपरिग्रहो मुमुक्षुर्विजितेन्द्रियो नित्यवेदाभ्यासरतः । कर्मसंन्यासी च सदैव ब्रह्मणि संस्थितो महायज्ञपरायणो बभूव । एषु ज्ञानसंन्यासी श्रेष्ठतमोऽभिमतः । स हि प्राणयात्राविषये जीवननिर्वाहविषये वा सर्वथा निश्चिन्तोऽभूत । स कदाप्यध्ययनश्रवणप्रवचनादिकं न समपादयत् ।[16]

भागवतानुसारं केचन संन्यासिनोऽवधूता बभूवुः । नग्ना व्यस्तकेशा मलिनदेहा उन्मत्तवदाचरन्तस्ते सामान्यजनानामुपहासपात्रं बभूवुः । लोकैः पीडिता अपि सन्तापिता अपि कटुवचनानि शृण्वन्तोऽपि तेऽक्रुद्धा आत्मन्येव रता अवर्तन्त । एतादृशां संन्यासिनां लक्षणानि भागवत इत्थं निर्दिष्टानि—

अव्यक्तलिङ्गो व्यक्तार्थो मनीष्युन्मत्तबालवत् ।
कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् ।। भाग० ७।१३-१०

संन्यासिन आचारो व्यवहाराश्च प्रायो विचित्रा अभवन् । भागवतानुसारम्

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ।। ११.१८.२८
बुधो बालकवत् क्रीडेत् कुशलो जडवच्चरेत् ।
वदेदुन्मत्तवद् विद्वान् गोचर्यां नैगमश्चरेत् ।। ११.१८.२९

---

१४ म० भा० शान्ति० १७२.१०–३६
१५ भाग० ५.५ ३२-३३
१६ प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका–पृ० ३३३

संन्यासिनश्चारित्रिकगुणाः

संन्यासी लोके सर्वथानासक्तो जगत्प्रपञ्चेभ्यो विमुक्तो हर्षविषादरहितो ऽभवत् । मनुना संन्यासिनश्चरित्र-वैशिष्टयानीत्थं कीर्त्तितानि--

नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ॥ ६.५
सत्यां वाचमहिंस्रां च वदेदनपकारिणीम् ।
कल्कापेतामपरुषामनृशंसामपैशुनाम् ॥ ६.४५
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ ६.४६
अतिवादांस्तितिक्षेत नावमन्येत कश्चन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ६.४७
क्रुद्धयन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ ६.४८
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ ६.४९
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बद्धयते ॥ ६.५८
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥ ६.६०

भागवतपुराणानुसारमात्मसंयमस्तितिक्षाल्पाहारोऽनासक्तिश्च संन्यासिनो गुणाः । हृदि तस्यासीमा क्षमा विराजते । जनैर्मुहुर्मुहुस्तिरस्क्रियमाणस्योपहस्यमानस्य कर्शितस्यापि तस्य निर्विकारमेव विद्यते मनः तद्यथा भागवते

एकश्चरेन्महीमेतां निःसङ्गः संयतेन्द्रियः ।
आत्मक्रीड आत्मरत आत्मवान् समदर्शनः ॥ ११.१८.२०
तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः ।
विरक्तः क्षुल्लकामेभ्यो लब्ध्वात्मनि सुखं महत् ॥ ११.१८.२३
नैतद् वस्तुतया पश्येद् दृश्यमानं विनश्यति ।
असक्तचित्तो विरमेदिहामुत्र चिकीर्षितात् ॥ ११.१८.२६
यदेतदात्मनि जगन्मनोवाक्प्राणसंहतम् ।
सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् ॥ ११.१८.२७

वेदवादरतो न स्यान्न पाषण्डी न हैतुकः ।
शुष्कवादविवादे न कञ्चित् पक्षं समाश्रयेत् ॥ ११.१८.३०
नोद्विजेत जनाद् धीरो जनं चोद्वेजयन्न तु ।
अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ ११.१८.३१

गीतायामपि संन्यासिनो गुणाः सम्यङ् निरूपिताः——

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १२.१३
ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते ॥ ५.२
न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥ ५.२०

संन्यासिन आध्यात्मिकचिन्तनम्

लौकिकविभूतिमुपेक्षमाणः संन्यासी सदैवाध्यात्मिकचिन्तने व्यापृतोऽवर्त्तत । सो ऽध्यात्मचिन्तनविमुखानां विषयलोलुपानां लोकानां दुर्गतिं समधीतवान् । एषा विचारसरणिर्मनुनेत्थमुपस्थापिता——

अवेक्षेत गतिर्नॄणां कर्मदोषसमुद्भवा ।
निरये चैव पतनं यातनाश्च यमक्षये ॥ ६.६१
विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः ।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥ ६.६२
देहादुत्क्रमणं चास्मात्पुनर्गर्भे च सम्भवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥ ६.६३
अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम् ।
धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ॥ ६.६४
सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः ।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥ ६.६५

भागवतानुसारम् – अहं परमात्मनि संस्थितोऽस्मि, इन्द्रियाणां विषयेष्वनुषङ्गो ऽनर्थकरः, इन्द्रियनिग्रह एव मोक्षः ईश्वरो हि सर्वव्यापी, जगन्नश्वरमित्यादयो विचाराः संन्यासिनस्तत्त्वचिन्तने परिस्फुटन्ति । स विचारयति– अनेकजलपात्रेषु दृश्यमानश्चन्द्रबिम्ब इवैक एवात्मा सर्वभूतेष्वनुस्यूतः । एक एव परमात्मा सर्वप्राणिषु विराजत इति । इदमेव संन्यासिन आध्यात्मिकसुखमासीत् ।

योगः

मनुस्मृतौ तथा च श्रीमद्भागवतेऽपि संन्यासिनः कृते योगस्य महत्त्वं प्रतिपादितमिति प्रागेव निर्दिष्टम् । अथ कोऽयं योगः ? योगश्चित्तवृत्तिनिरोध इत्याह पतञ्जलिः । योगी दुर्निग्रहं नितरां चञ्चलं चित्तं वशीकर्त्तुं यतते ।

तथा चोक्तं गीतायाम्—

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।। ६.३५

चित्तवृत्तयो हि स्वभावत उच्छृंखलाः । तेषां निरोधो न्यूनाधिकं सर्वैः क्रियत एव । न तथा सत्युन्मत्तवदाचरेल्लोकः । चित्ते निःसीमशक्तिनिगूढा वर्त्तते । अस्या एकाग्रीकरणाय सदुपयोगाय च योगे योजना परिकल्पिता । योगिनः कृते चित्तं सहायकं साधनं च । अस्मिन् शुद्धता सात्त्विकता चापेक्षिते । अयमेव चित्तवृत्तिनिरोधः ।[17] वैदिकसाहित्यानुसारमिन्द्रियाणां स्थिरधारणा एव योगः । इन्द्रियाणि संयम्य योगी खल्वप्रमत्तो भवति ।[18] अथर्ववेदे तु योग इत्थं व्याख्यातः —

मूर्धानमस्य संसीव्याथर्वा हृदयं च यत् ।
मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधि शीर्षतः ।। अथर्व १०.२.२६

पातञ्जलयोगोऽष्टाङ्गिकः । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि । यमैर्नाहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाणां सिद्धिः । शौचसन्तोषस्वाध्यायेश्वरप्रणिधानानि नियमाः । आसनप्राणायामाभ्यां चित्तस्यैकाग्रता धारणाशक्तिश्च प्रादुर्भवतः । चित्तस्य स्थिरता तु धारणा । इन्द्रियाणां विषयेष्वननुषङ्गः प्रत्याहारः । धारणा ध्यानं समाधिश्चैते त्रयः समुदिताः संयम इत्युच्यन्ते । चित्तस्यैकदेशे निवेशो ध्यानम् । ध्यानस्य सर्वोच्चावस्था समाधिः, यत्र ध्येयं विहायान्यस्य कस्याप्यस्तित्वं न भवति साधकस्य कृते ।

योगो वैदिकजैनबौद्धसंस्कृतिषु मानवव्यक्तित्वस्य सर्वोच्चविकासार्थं प्रकृष्टं साधनं सम्मतः । महापुराण उक्तम्—

अणिमादिगुणैर्युक्तमैश्वर्यपरमोदयम् ।
भुक्त्वेहैव पुनर्मुक्त्वा मुनिर्निर्वाति योगवित् ।।

(म० पु० २१.२.३८)

---

१७ प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका– पृ. ३३७

१८ कठोपनिषद् ६.१

यथा यथा मानवो विलाससाधनानपेक्षो जायते तथा तथा शाश्वतमानन्दं स लभते। शरीरस्यावयवाः जगद्गताः पदार्था वा अखण्डानन्दावाप्तिसाधनानि भवितुं नार्हन्ति। शरीरसंन्यासेनात्मनोऽनुभवेन च मुक्तिः सम्भाव्यते। आत्मा एवाखण्डानश्वरानन्दसाधनं योगेन च तदुपलब्धिः।

लोकः शरीरस्य भस्मान्तां परिणतिं विस्मृत्य क्षणभंगुरभोगसाधनेष्वनुषक्तः सुखिनमात्मानं मन्यते। योगी तु न जातु कामः कामानामुपभोगेन शाम्यतीत्युपनिषद्वचः प्रमाणीकृत्य जागतिकप्रपञ्चेष्वनासक्त आत्मोपलब्ध्या ब्रह्मानन्दं लभते[19] गीतायामेतदेव तत्त्वमित्थं स्पष्टीकृतम्--

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।। २.६९

योगेन गीतायामुल्लिखिता ब्राह्मी स्थितिरुपलभ्यते।[20] अतो योगस्य महिमा सर्वङ्कष इति मन्यामहे। गीतायामप्युक्तम्--

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन।। ६.४६

कर्मयोगः

संन्यासी यथाशक्यं कर्म परिहरति स्म। आध्यात्मिकानन्दप्राप्तिमार्गे कर्माणि बाधकानि भवन्तीत्यासीत् संन्यासिनां विचारणा। कर्मणां त्यागेन मुक्तिः सम्भाविता। यतो हि कर्मफलभोगार्थमेव जन्ममरणे भवतः। कर्मत्यागो मोक्षप्राप्तिसाधक इति सिद्धान्तो बौद्धजैनमतावलम्बिभिरप्यङ्गीकृतः। इत्थं लोकसम्मत एव कर्मसंन्याससिद्धान्तः। तथापि कतिपयविचारका योगेनैव मोक्षप्राप्तिं स्वीकृतवन्तः। फलं प्रत्यासक्तिं विहाय कृतं कर्म न भवति बन्धनकारणमपितु मोक्षसाधनमेवेत्येषा कर्मयोगविचारधारा। ईशोपनिषदि प्रोक्तम्--

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे। (ईशावास्योपनिषद् २)

इत्थमस्माकं संस्कृतौ कर्मविषये द्वे मते सिद्धान्तिते। निखिलं कर्म दोषवत्

---

१९ बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते।। ५.२१

२० एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।। २.७२

त्याज्यमित्येके प्राहुः, यज्ञदानतपःकर्म न त्याज्यमिति चापरे ।[21] गीतानुसारं यज्ञदानतपःकर्मानासक्त्या कृतं न त्याज्यम्—

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ।। १८.५

गीतायां प्रतिपादितं यत् काम्यकर्मणां परित्याग एव संन्यासः ।[22] यतः कर्मणामात्यन्तिकपरिहारो हि नाम सर्वथाऽसम्भवः । अतः कर्मफलत्याग एव श्रेयस्करः ।[23] कर्मणोऽपरिहार्यत्वमालोच्य भगवानर्जुनमुपदिशति—

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।। (गीता ३.८)

कर्मयोगी कर्त्तव्यकर्मानसक्तबुद्ध्या समाचरति । कर्मणा तेन तस्य देवदेवस्य परब्रह्मपरमात्मनो ऽर्चना सम्पाद्यते यतः सर्वाणि भूतानि जायन्ते यश्चाखिलं जगद् व्याप्य स्थितः ।[24] अनेन विधिना कर्म समाचरन् मानवो न कदापि कर्मफलभाग् भवति ।[25]

कर्मयोगिनो जीवनविन्यासः

कर्मयोगी योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा जितेन्द्रियश्च भवति ।[26] सर्वत्रानासक्तबुद्धिर्विगतस्पृहोऽसौ कर्माणि कुर्वन्नपि नैष्कर्म्यसिद्धिमधिगच्छति ।[27] सर्वदा कर्मसु व्यापृतोऽपि स नाहं किंचिदपि करो-

---

२१ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ।। १८.३

२२ काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः । गीता १८.२

२३ न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ।। गीता १८.११

२४ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।। गीता १८.४६

२५ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमान् लोकान् न हन्ति न निबद्ध्यते ।। (गीता १८.१७)

२६ योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ।। ५.७

२७ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ।।

मीति मनुते । केवलमिन्द्रियाणि तस्य विषयेषु व्यासक्तानि जायन्ते, मनस्तस्य निर्विकारमेव भवति । कर्मयोगिनः कार्यपद्धतिर्भगवद्गीतायां साधु विशदीकृता । तद्यथा—

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तो ऽपि नैव किंचित्करोति सः ।।
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ।।
यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबद्धयते ।।
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ।। गीता ४।२०-२३

संन्यासिनामिव कर्मयोगिनामपि किमपि कर्त्तव्यं नास्ति किन्तु लोकसंग्रहार्थं- मसावनवरतं कर्म समाचरति । तथा हि गीतायाम्—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि ।।
यदि ह्ययं न वर्त्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ।।
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् (३।२२-२४)

अत एव कर्मणि सक्ता अविद्वांसोऽज्ञानिनो जना यथा लोके कर्म समाचरन्ति तथैव लोकसंग्रहचिकीर्षुर्विद्वानसक्तः कर्मयोगी । सोऽज्ञानां कर्मसङ्गिनां बुद्धिभेदमजनयन् सर्वकर्माणि समाचरन्नपि गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते—

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद् विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ।। (गी० ३।२५)
न बुद्धिसेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान् युक्तः समाचरन् ।। (३।२६)
तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते ।। (।२८)

कर्मयोगिषु भगवद्भक्तिरप्यपेक्षिता । यतात्मा दृढनिश्चयो योगी सततं सन्तुष्टो मनो बुद्धिं च भगवति समर्प्य भगवतो वास्तविकस्वरूपं विजानाति । भगवद्व्यापाश्रयः स सर्वकर्माणि कुर्वाणो भगवत्प्रसादाच्छाश्वतमव्ययपद-

मवाप्नोति ।[28]

कर्मयोगी यज्ञतपोदानादीनि कर्माणि लोकसंग्रहायानासक्तबुद्धया सम्पादयति तथैव सदोषमपि स्वभावजं कर्म स न त्यजति ।[29] असक्तबुद्धिर्वर्णधर्मानुकूलं जुगुप्सितमपि कर्म कुर्वन् न स दोषभाग् भवति । महाभारत उल्लिखित-स्तुलाधारवैश्योऽत्र निदर्शनम् ।

संन्यासकर्मयोगयोर्वैशिष्ट्यानि

संन्यासकर्मयोगौ खलु निःश्रेयससिद्धये द्वौ पन्थानौ । एतयोर्यं कमप्य-वलम्ब्य मुमुक्षुर्मुक्तिमाप्नोति—'एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ।' (गी० ५।४) । श्रीकृष्णमतेन कर्मयोगपथः प्रशस्यतरः ।[30] ननु कोऽत्र विशेषो-ऽस्मिन् कर्मयोगमार्गे ? अयं मनुष्यलोको हि कर्मभूमिः । अत्र कर्मण आत्यन्तिकपरिहारोऽसम्भव इति प्राङ् निर्दिष्टम् । यः खलु कर्मसंन्यासी सोऽपि नास्ति कर्मभ्यः सर्वथा विमुक्तः । संन्यासिकर्मयोगिनोरयमेव विशेषो यत् संन्यासी यथाशक्यं कर्म परिहरति । तथापि स नियतकर्माणि न शक्नोति संन्यस्तुम् । यथा चोक्तं भगवतापि— नियतस्य तु संन्यासः कर्मणो नोप-पद्यते' (गी० १८।७) । कर्मयोगी तु यथाशक्यं लोकहितार्थमधिकाधिकं कर्म सम्पादयति । संन्यासी तु आत्मकल्याणमेव केवलं वाञ्छति, कर्मयोगी च स्वव्यक्तित्वस्य विकासेन सह लोकाभ्युदयमपि समुद्दिशति । अतो भगवता 'कर्मसंन्यासात् कर्मयोगो विशिष्यत' इति प्रमाणितम् ।

———

२८ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥
सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ (गीता १८।५५–५६)

२९ स्वभावजं कर्म कौन्तेय सदोषमपि न त्यजेत् । (गी० १८।४८)

३० संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥ (गी० ५।२)

गीतोपदेष्टा तु कर्मपरित्यागमात्रमेव संन्यासं न मनुते ।[31] यो निरग्निरक्रियो वा न स योगी, अपितु कर्मफलमनाश्रितो यः कार्यं कर्म समाचरति स एव संन्यासी स एव च योगी ।[32] यः पुरुषो भौतिकदेहेन कर्माणि परित्यज्य मनसा विषयेष्वनुषज्जते स खलु मिथ्याचार एव ।[33] अतो मनसि विषयान् प्रति योऽनुषङ्गो विद्यते तदपाकरणं संन्यासिनः कृते तथैव कर्मयोगिनोऽपि कृते नितरामनिवार्यं कर्मणां न्यासः क्रियेत वा न क्रियेत वा । अत एवोक्तम्-काम्य-कर्मणां न्यास एव संन्यास इति । यः संन्यासी स न केवलं कर्माणि अपितु तेष्वासक्तिमपि त्यजति । यः खलु कर्मयोगी सोऽपि कर्मफलासक्तिं परित्यजति किन्तु कर्माणि सम्पादयति । कर्मसम्पादनहेतुश्च लोकसंग्रहः । अतः कर्मयोगिनः कर्मयोगे किमपि वैशिष्ट्यं वरीवर्त्तीति नास्त्यत्र सन्देहावकाशः । तद्यथा —

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ।। (गी ३।७)

तत्त्वतस्तु नास्त्येतयोरुभयोः कोऽपि भेदः । तथाप्यसंशयं कर्मयोगो मोक्षमार्गेषु सर्वोच्चस्थानमर्हति । एष खलु व्यक्तित्वविकासस्य सर्वोच्चसोपानमभिमतः । अभ्यासाज् ज्ञानं ज्ञानाद् ध्यानं ध्यानात् कर्मयोगः श्रेय इति गीताया अभिप्रायः ।[34] कर्मयोगी च तपस्विभ्यो ज्ञानिभ्योऽप्यधिको मतः ।[35] वन्द्यः खलु ब्रह्मसंस्थः संन्यासी किन्तु धन्योऽसौ निरपेक्षो निरहङ्कारः कर्मयोगी यो हि प्राभातिकविभाकर इव जनमनःकमलानि विकासयन् वितनुते सततंकार्यपरम्परां लोकसंग्रहायेति ।

---

३१ न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ।। (गी० ३।४)

३२ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ।। (गी० ६।१)

३३ कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ।। (गी० ३।६)

३४ श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते ।
ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ।। (गी० १२।१२)

३५ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ।। (गी० ६।४६)

रसस्य शाब्दत्वमीमांसा

विश्वनाथमिश्रः

अत्र शाब्दत्वोक्त्या वैवक्षकः काव्यरसः । विवेच्यविषयोद्देश्यतावच्छेदकाक्रान्तत्वात्तद्विवेचनं नान्तरीयकतामापद्यते इति प्रस्तूयते पूर्वं कोऽसौ रस इति ! विविधवैचित्र्योपेतेऽत्र जगज्जालेऽनादिकालतोऽटाट्यां कुर्वतः प्राणिनो दृष्टिपथमवतरन्ति विभिन्नाः परिस्थितयः । स कदाचित् कुत्राप्यनुरज्यति, अपरज्यत्यपरत्र, कुत्रापि कुप्यति, इतरत्रासूयति, विरज्यते चान्यत्र, बिभेति च कुतश्चित् । आपनीपद्यमानायामेतादृश्यां परिस्थितौ स्वभावात् कठिनात्मकं मानवानां चित्तद्रव्यं द्रवत्वं प्रतिपद्यते तापकैर्विषयैर्योगे जतुवत् । लाक्षा हि स्वभावतः कठिना, तापकाग्निद्रव्यादिसमवधानात् जलवत् द्रवीभावमापद्यते । तत्र च निक्षिप्तं रङ्गं यथा लाक्षायाः सर्वांशे प्रविष्टं सल्लाक्षां स्वाकारतामानयति तथैव विषयसम्प्रयोगात् द्रवावस्थापन्ने चेतसि वस्तुस्वरूपं प्रविष्टं सत् काठिन्यदशायामपि तत्र सूक्ष्मरूपेणावतिष्ठते । एवञ्च शीततेव तोयस्य उष्णतेव दहनस्य, संचरिष्णुतेव पवनस्य, अनादिकालात् द्रवच्चित्तप्रविष्टतत्तदिष्टानिष्टविषयकोटिसंकीर्णता चित्तस्य स्वाभाविकी । तत्र चान्तःकरणसंभिन्ना सूक्ष्मविषया एव वासनाभावभावनादिविभिन्नशब्दैरभिलप्यन्ते । तदुक्तम्—

द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुना ।
संस्कारवासनाभाव - भावनाशब्दभागसौ ॥

भक्तिरसायनम् । १.६

मानवानामन्तःकरणेष्ववस्थिता इमा भावना एव काव्यक्षेत्रमवतीर्णा रत्यादिस्थायिभावपदाभिधीयमानतामुपयान्ति । समुचितललितसन्निवेशचारुणा काव्येन समुपस्थाप्यमानेषु विभावादिषु प्रकारान्तरेण वा प्रत्यक्षीक्रियमाणेषु तेषु पुनः पुनरनुसन्धानात्मिकया काव्यार्थभावनया जायते तेषां साधारणीकरणम् भवति च सहृदयानामन्तःकरणस्य तदाकाराकारात्मिका चित्तवृत्तिरपि । चित्तवृत्त्यानया विषयीक्रियते विषयावच्छिन्नचैतन्यमेव । पश्चाच्च विभावादिभिः सम्भूय प्रादुर्भावितेनालौकिकेन व्यापारेणानन्दांशतिरोधायकेऽज्ञानावरणेऽपाकृते सति

द्रवावस्थापन्नायामन्तःकरणवृत्तावुपारूढं विषयावच्छिन्नचैतन्यमेव पूर्वं भावरूपतामापद्य विगलितवेद्यान्तरसम्पर्कशून्येनानन्दस्वरूपेण वृत्त्यनवच्छिन्नचैतन्येन सहैकीभावमापद्यते । एकीभावमापन्नयोरनयोः वृत्त्यवच्छिन्नानवच्छिन्नचैतन्ययोराभासेन स्फुरितोऽथवा तेनैव सहास्वाद्यतां वा नीयमानो रत्यादिस्थायिभाव एव रसतामञ्चति । तदुक्तम्—

व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ।

अत्र व्यक्त इत्यस्यार्थो व्यक्तिविषयीकृतः । व्यक्तिश्च भग्नावरणा चित् तदास्वादौपयिक-भूतव्यञ्जनव्यतिरिक्ता । स च रसश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः काव्यार्थमात्रसंभेदादात्मानन्दसमुद्भवः । चवर्णा चानन्दांशाभिव्यक्तिः । लौकिकज्ञानान्तरं तु न तथा तत्रावरणभंगस्य वक्तमशक्यत्वात् । अन्यो हि मोदकस्यास्वादोऽन्यश्च प्रत्ययो रसस्य । अतोऽयमतिरिच्यते लौकिकविषयास्वादात् । लौकिकसुखसाक्षात्कारे रजस्तमसोरनभिभवात् तत्र सुखदुःखमोहात्मकं भानं नैसर्गिकम् । काव्यरसास्वादे तु रजस्तमसोः निगीर्णतया सुखास्वाद एव केवलमिति विशेषः । वृत्त्यवच्छिन्नचैतन्यम्, विषयचैतन्यम्, आत्मचैतन्यमिति चैतन्यत्रयसमवधाने एव प्रत्यक्षम् । अत एव घटाकाराकारितायामन्तःकरणवृत्तावात्मचैतन्याभास एव घटप्रत्यक्षमित्युच्यते । सरण्यानया रसाभिव्यक्तेरियमेव व्याख्या ।

अथ चैतस्य चर्व्यमाणतैकप्राणस्य रसस्यास्वादने किं कारणमिति चेत् काव्यनाट्यश्रवणदर्शन-महिम्ना सहृदयसामाजिकनिष्ठरत्यादेरुद्बोधनपुरःसरमास्वादनस्याभिमततया शब्द एव कारणमिति शक्यते वक्तुं निर्विवादम् । न चैवं प्रपौत्रं प्रति पितामहस्य कारणत्वं, घटं प्रति रासभस्य च कारणत्वं यथा नोपपद्यतेऽन्यथासिद्धत्वात्, तथैव काव्यशब्दस्याप्यन्यथासिद्धत्वमेव रसास्वादं प्रतीति वाच्यम् ? नहि घटमिव रसमुत्पित्सते, न वा प्रपौत्रमिव रसमपि बाह्यसत्तासमाविष्टत्वेनोत्पाद्यते । चित्तवृत्तिविशेषस्य केवलं प्रतीतिपथगोचरीक्रियमाणस्य रसस्य काव्यनिष्ठोत्थापकतानिरूपितोपस्थाप्यैकमात्रत्वात् । उत्थापकनोत्पादकतयोश्च दूरं विभेदसत्त्वेन दृष्टान्त-दार्ष्टान्तिकभावस्यात्र शिथिलप्रायत्वात् ।

शब्दश्रुतेरनन्तरं यः खलु जायते बोधस्तस्य शाब्दत्वे न कस्यापि संशीतिलेशोऽपि । चैत्र पुत्रस्ते जात इति शब्दे समुच्चारिते सति चैत्रस्य यो बोधस्तस्य शाब्दत्वे नास्त्यवकाशो विपर्ययस्य । शाब्दज्ञानानन्तरं तत्र जायमाना प्रसन्नता शाब्दबोधफलीभूता चेष्टादिभिरनुमीयमानैव चैत्रः सहर्षः शाब्दबोधानन्तरं प्रसन्नमुखत्वेनोपलक्ष्यमाणत्वात् । अत्र शाब्दबोधः चैत्रनिष्ठः, प्रहर्षानुमितिस्तु

अनुमातरि इत्याश्रयभेदाद्भिन्नयोर्ज्ञानयोरैक्यमापादयितुं कोऽयं शिथिलः क्रमः ? रसस्थले च नैतादृशी स्थितिः । अत्र तु यस्य श्रोतुः काव्यशब्दात् विभावाद्यवगमस्तस्यैव पुनरनुसन्धानपरम्परया रसानुभूतिरपि । न चानुभूतिः शब्दवाच्या । मधुरादिपदार्थस्य माधुर्यमिव तस्याः शब्दावाच्यत्वमेवेति रसस्य शब्दोपस्थाप्यत्वेऽपि शब्दप्रतिपादनाविषयत्वमेव । देदीप्यतेऽत्र रौद्रः, विभ्राजते तत्र वीरः संलक्ष्यते तत्र शान्तः, इत्याद्युक्त्या न रस-संप्रत्ययः, काव्योपस्थाप्य-तदभिव्यञ्जकविभावादिविरहस्यात्र तन्त्रत्वात् ।

"अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" इत्युक्त्या काव्यशब्दैः ज्ञायमानानां विभावादीनां शब्दानुविद्धतया नान्तरीयकतया प्रत्यक्षानुमानयोरप्युच्छेद-भीतिः मिथ्यैव । सर्वं ज्ञानं शब्दानुविद्धं न तु शब्दजन्यम् । अन्यद् हि शब्द-निरूपितजन्यत्वम् अन्यच्च शब्दानुविद्धत्वम् । ज्ञाता च सर्वस्मिन्नपि ज्ञानेऽनुभवति शब्दम् । न चात्र प्रमाणाभावः, स्वानुभवस्यैवात्र प्रमाणायमानत्वात् । शब्द-जन्यमेव ज्ञानं शाब्दम् । न च प्रत्यक्षानुमाने शब्दजन्ये । एवंस्थिते शब्दजन्यता-शब्दानुविद्धतयोरैक्यमवबुद्ध्य प्रत्यक्षानुमानयोरुच्छेदभीतिरसंगतैव । एतेन शब्दानुवेधपक्षे शब्दोपस्थितार्थजन्येऽपि विषये शब्दजन्यत्वस्यैवोपगमे लाघवमिति कथनमपि पराकृतमेव वेदनीयम् ।

अलंकाराश्च स्वरूपतः शब्दार्थयोर्वर्त्तमाना रसाद्यभिव्यञ्जकविभावाद्युत्कर्षा-धायकाः कथं साक्षादुपकुर्वीरन् रसम् ? न चान्यस्योत्कर्षकोऽपरमप्यलंकुर्यात् साक्षात्सम्बन्धेनेति परम्परीणस्तेषां क्वचित्कः सम्बन्धः रसेन । किञ्च शब्दानु-विद्धतापक्षे शब्दबुद्धिकर्मणां तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वगाथापि नान्यथासिद्धा। शब्दानुविद्धानि ज्ञानानि तृतीयक्षणे नश्यन्ति चेत् किमपराद्धं तत्र शब्दानुविद्धतया। वस्तुतस्तु "इदानीं जानामि" इदानीमुच्चारिताः इत्यादिव्यवहारे अस्मदभिन्न-कर्तृवृत्ति वर्तमानकालिकैतत्क्षणावच्छिन्नावरणभंगानुकूलो व्यापारः" इत्यर्थस्याभि-मततया तथा "सोऽयं गकारः" इति प्रत्यभिज्ञायमानत्वे न च "शब्दबुद्धिकर्मणां क्षणिकत्वं वक्तुमशक्यम् ।

अथोच्यते काव्यरसोद्बोधं प्रति काव्यशब्दस्य करणत्वे व्यञ्जनमेव व्यापारः। न चेदं व्यञ्जनं कुत्रापि श्रुतं दृष्टं वेत्युच्यते चेत्–विनष्टं निखिलं वैयञ्जनिकं विवरणं, विलुप्ता खलु प्रौढमर्यादा । यत्र श्रुता इतरेतराध्यासरूपतादात्म्यग्राह्या वाच्यवाचकभावापरपर्याया, संकेतितार्थबोधजनिका प्राथम्यमुपगता अभिधा, यत्र च श्रुता शक्यार्थातिरिक्तार्थं बुबोधयिषया तात्स्थ्यात्, तत्सामीप्यात् तद्धर्म्यात् तत्साहचर्यादतस्मिन् तत्त्वसम्पादिका शक्यतावच्छेदकारोपरूपा लक्षणा, तत्रैव शास्त्रे निपातानां वाचकत्वद्योतकत्वविवदिषाप्रयोजिका मुख्यार्थ-सम्बद्धासम्बद्ध-

प्रसिद्धाप्रसिद्धार्थाभिव्यञ्जिका ध्वननद्योतनप्रत्यायनादिविभिन्नपदव्यपदेशविषया व्यञ्जनापि वर्तते परां ख्यातिमुपगता । "स्वायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामहे" इति नियमात् "गंगातटे घोषः" इत्यस्यैव प्रयोक्तव्ये "गंगायां घोषः" इत्याकारकः प्रयोगो घोषाधिकरणकशैत्यपावनत्व-प्रतिपिपादयिषयैव कृतः न च शैत्यपावनत्वमभिधावेद्यम्, तत्र गंगाशब्दस्यासंकेतितत्वात् । नापि लक्षणयाऽनुमानाद् वा व्यङ्ग्यप्रत्ययः मुख्यार्थबाधाद्यभावे व्याप्त्याद्यप्रतिसन्धाने पक्षतोपरागं विना च तत्प्रतीतेः । किञ्च "अनुमिनोमि न साक्षात्करोमि" इत्यनुव्यवसायबलात् यथा प्रत्यक्षादनुमानमतिरिच्यते तथैव "अनेनेदं नोक्तं नापि लक्षितं किन्तु व्यञ्जितमिति प्रतीत्या अभिधालक्षणाभ्यामतिरिक्ता व्यञ्जना । सा च काव्यजीवातुभूतार्थबुभुत्सयोपास्यैवेति विकल्पातीतोऽर्थः ।

यदप्युच्यते—लक्षणारोपिता क्रिया । स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणेति मम्मटोक्त्या लक्षणाया मुख्यार्थवृत्तित्वं, तदाश्रितत्वाच्च व्यंजनाऽपि अर्थव्यापार एव न तु शब्दव्यापार इति । तत्र प्रोच्यते—सान्तरार्थनिष्ठ इत्यत्र निष्ठत्वं विषयत्वरूपम् । मुख्यार्थव्यवहितलक्ष्यार्थ-विषयकत्वादेव लक्षणात्मकः शब्दव्यापारः सान्तरार्थनिष्ठ इत्युच्यते । नैतावता तस्यार्थव्यापारत्वं साधयितुं शक्यम् । वस्तुतस्तु शक्यतावच्छेदकारोपद्वाराऽप्रसिद्धशक्त्याबोधस्थले लक्षणेतिव्यवहारस्य प्रथिततया तस्य शब्दव्यापारत्वे को नु सन्दिहीत । एवञ्च लक्षणाया निराकृतेऽर्थव्यापारत्वे अर्थव्यंजनया सह तस्याः साम्यप्रदर्शनं मुधैव । किञ्च-व्यंजनाया अभिधालक्षणोभयमूलतया लक्षणा अर्थव्यापार इत्यसत्पक्षमुररीकृत्य तस्या अर्थव्यापारप्रसाधनपरो व्यापारोऽप्ययथार्थ एव । लक्षणाश्रयाया अर्थव्यापारत्वे, अभिधाश्रयायाः का गतिः ? न च समुपेक्ष्या सेति वाच्यम् ? हेतुमन्तरा समुपेक्षमाणासाध्यत्वात् । तस्माच्चिन्तनीय एवायं पन्थाः । तथा हि—

अभिधावत् लक्षणापि शब्दव्यापार इति तदुभयमूलव्यंजनायाः शाब्दव्यंजनात्वम् । न ह्यत्रान्वयव्यतिरेकावुपयुज्येते तस्याः शब्दार्थगतत्वव्यवस्थापने । गंगायां घोषः "इत्यस्य स्थाने भागीरथ्यां घोषः" इत्युच्चार्यमाणेनापि शैत्यपावनत्वप्रतीतिः सर्वानुभवगोचरा पुष्णातीदमेव तथ्यम् । एवञ्च काव्यात्मकशब्दार्थावाम्रेडनेन भवति रसचर्वणा व्यङ्ग्यार्थप्रत्ययो वेति प्रयोजनसम्पत्तयेऽभिमतव्यापारस्य शब्दार्थगतत्वमेवादरणीयम् । तत्रापि मुख्यत्वं शब्दव्यापारत्वे, अर्थस्यापि शब्दायत्तस्थितिकत्वात् ।

अर्थव्यंजनन्तु वक्त्रादिवैलक्षण्यप्रयोज्यमर्थस्यान्यार्थधीहेतु प्रतिभाजुषाम् । काव्यवासनापरिपक्वबुद्धय एव वाच्यलक्ष्यव्यतिरिच्यमानमर्थमवबोद्धुं प्रभवः । प्रतिभाहीनाः काष्ठकुड्यकल्पाः पृथक्भूता व्यङ्ग्यार्थवधारणात् । न चैवं गङ्गायां

घोषः "इत्यत्रापि तीररूपार्थप्रतीत्यनन्तरं शैत्यादेः प्रतीतेरत्राप्यर्थव्यंजनाक्रान्तत्वमाशंकनीयम् ? प्रवाहसमवेतशैत्यादेरेव घोषे व्यंजनात् । तीरस्यापि आरोपितशक्यतावच्छेदकप्रकारकभानाभ्युपगमात् । न चार्थीव्यंजनायाः प्रतिभावतां प्रकरणज्ञानां कृते सुरक्षिततया स्वार्थानुमानादस्या भेदो नास्तीति शंक्यते चेत्तर्हि अस्थाने खल्वियं विप्रतिपत्तिः । न हि कोऽपि सचेताः गतोऽस्तमर्कः" इति शब्दं संश्रूय सान्ध्यो विधिरूपक्रम्यतामित्यर्थमनुमिनोति अपित्ववगम्यते । न ह्यत्र श्रुतोऽनुमितोप्यर्थमनुमित्यनुव्यवसायः किन्त्ववगतः खल्वयमर्थ इत्येव । न चावगमनं व्यंजनादतिरिच्यते । प्रमाकरणं प्रमाणमिति व्युत्पत्त्या अनुमानस्य यथार्थज्ञानकरणत्वं न तु यथाकथञ्चिद् व्यवहारोपपादनं युक्तम् । अतस्तत्र सिषाधयिषाविरहो विशिष्टसिद्ध्यभावाधिकरणे व्यापकवदन्यावृत्तित्वविशिष्टेन हेतुनानुमीयते किमपि तथ्यं प्रमेयात्मकम् । एतद्विपरीतमनुमानन्तु यात्युपहास्यताम् । लोकव्यवहारे कस्यापि विशिष्टं कृत्यं संदर्श्य यतो ह्ययमेतादृशः, अत एवंविध इति यत्किमप्यवबुध्यते तदपि नातिक्रमते सीमानं व्यंजनायाः । चेष्टाया अपि अर्थव्यंजनमध्ये परिगणितप्रायत्वात् । यद्येतादृशस्थलेऽनुमानेति नामान्तरेण तोषस्तर्हि अलं रोषप्रदर्शनेन व्यंजनोपरि । किञ्च, नहि नापितोऽन्ध आरण्यको जन्तुविशेषो वा येनासावनुमानशरणीकरणमन्तरा केशकर्तनेन समं कर्णकर्तनमपि विदध्यात् । न हि प्रत्यक्षसिद्धे वस्तुनि अधिकारोऽनुमानस्य । किञ्चानुमानेन व्यंजनां गतार्थयता शब्दस्यापि प्रामाण्यं विच्यावितमेव स्यात् । ग्रामं गच्छतीत्यत्र कर्मत्वं ग्रामनिष्ठं, ग्रामनिरूपिताकांक्षायोग्यतादिमत्पदस्मारितत्वादित्यनुमानेन शाब्दसमानाकारज्ञानसंभवात् । किञ्च अनुमानेन व्यंजनामन्यथासिद्धयितुमाग्रहो न मुञ्चति चेत् व्यंजनयैवानुमानस्य वैयर्थ्यं को नु दूरीकुर्यात् । व्यंजकानां यथाकथञ्चित् सत्ता व्यङ्ग्यबोधनक्षमा न तु अनुमानवद्व्याप्तिपक्षधर्मतोपसंहारप्रपञ्चस्याडम्बरोऽपेक्ष्यतेऽत्रेति लाघवमपि । किंचैवं तद्बीजनकत्वस्यैव व्यंजनात्वमभ्युपेत्य लक्षणायाः कृतेऽपि दत्तांजलिरेव स्यात् । तस्मात् व्यक्तिव्यतिभेदे कुण्ठितोऽनुमानप्रहारः ।

यच्चोच्यते—विभावादीनां शब्दसमर्पितानां समूहालम्बनात्मकेन ज्ञानेन निराकृतेऽज्ञानावरणे यदिदमात्मचैतन्यं प्रकाशते, तत्र नहीयमलौकिकी काचित् व्यक्तिः अपि तु लौकिक्येव । अत्रेयमभिसन्धिः—नहीयं व्यक्तिर्लोकसाधारणी नहि घटादिवत् सिद्धः पूर्वतो रसः। अनुभवकालमात्रजीवनस्य घटेन सह साम्यस्याशक्यवक्तव्यत्वात् । व्यक्तश्चायं रसादिष्वन्यमानो दध्यादिन्यायेन न तु दीपेन पूर्वसिद्धः । न च दध्यादिन्यायेनाभिव्यक्तौ दधीव रसस्यापि चाक्षुषप्रत्यक्षत्वं स्यादित्युच्यते चेत् मानसप्रत्यक्षविषयस्य सुखदुःखादेश्चाक्षुषत्वं कथमिव वार्यते । चित्तवृत्तिविशेषो ऽमूर्तो रसः कथं स्थूलायितः स्यात् दधीव । सुखाद्युपलब्धि-

साधनमिन्द्रियं मन एव न तु चक्षुरिति रसस्य चाक्षुषप्रत्यक्षाभिलाषो व्यामोहजनितः।

अर्थव्यंजने वाच्यार्थस्य व्यंजकतायाम् "स्वरूपं प्रकाशयन्नेव परार्थावभासको व्यंजकः" इतिलक्षणलक्षितव्यंजकत्वं वाच्यार्थे निपुणतया सुस्थिरम्। स्वं प्रकाशयन् वाच्यार्थो व्यङ्ग्यार्थमपि पश्चात् प्रकाशयत्येव। न चैतादृशस्थले प्रकाश्यप्रकाशकयोः समानकालिकप्रतीतिरुचिता, अनुभवविरोधात् लोकसिद्धं हि तयोः पौर्वापर्यम्। सहैव तयोर्भाने तु प्रकाश्यप्रकाशकभाव एव नोपपद्येत। वैपरीत्यमेव वा सम्पद्येत।

अथ कोऽयं लौकिको रसः? मधुराम्ललवणादिभेदाद् भिन्नः? किं वा लौकिकदुष्यन्तादिनिष्ठः शाकुन्तलदर्शनजो ऽपरपर्यायः प्रेम्णः? न चैतत्कल्पः काव्यरसः, वेद्यान्तरसम्पर्कशून्यत्वेनानुभूयमानस्य तस्य विषयवासनासम्पृक्तेन क्षोदीयसा लौकिकमाधुर्येण सहैक्याभावात्। नाप्यनुकार्यदुष्यन्तादिगतलौकिकानन्दकल्पः काव्य-शब्दजानन्दः। तस्य परिमितत्वसान्तरायत्वलौकिकत्वसमानाधिकरणहेयोपादेयशंकातंकाकुलत्वेऽपि अस्य सर्वथैव युष्मदस्मद्प्रत्ययविरहिता सामान्यदृशा सत्त्वोद्रेकविधिना साक्षात्क्रियमाणत्वात्। न च लौकिकरसास्वादे रजस्तमसोरनुद्रेकः, न वा तत्र भग्नावरणचिद्भासाभासनम्। किं बहुना भोज्यभोजकयोः लौकिकयोः सम्प्रयोगात्तेषां क्षौद्रयं दुर्निवार्यम्। शरावादिनिवृत्तौ दीपप्रयोज्याभिव्यक्तिकल्पाभिव्यक्तिरेव सम्मता। नैतावता लौकिकालौकिकयोः साम्यम्। एकत्र विषयसमवधानम्, अपरत्र तत्प्रतियोगिकात्यन्ताभावः। कथञ्च विषयविप्रयोगसमवधानेऽप्यानन्दाभिव्यंजिका व्यक्तिः, विषयसम्प्रयोग कालिकाभिव्यंजकद्वीपाभिव्यक्तितुलामर्हेत्। अनुकूलविभावादिसमवधानात् द्रवावस्थापन्नायां तदाकाराकारितायां चित्तवृत्तौ विषयावच्छिन्नचैतन्यस्यैवांशिक्यभिव्यक्तिरिति लौकिकसंगीताभिनयशिल्पादिश्रवण – दर्शनस्थलेऽप्यलौकिक्येव व्यक्तिः केषाञ्चिदेव। सत्यज्ञानावरणे न शिल्पेन, न वा संगीतेन, न चाभिनयेन वानन्दाभिव्यक्तिः। एतेन रसास्वादोऽपि वस्तुतो लौकिकास्वादकल्प एव। सत्त्वोद्रेकस्य, संविद्विश्रान्तेः, प्रकाशानन्दसंभोगस्य चोभयत्राप्यभेदादित्येतत् सर्वं निराकृतम्।

वस्तुतस्तु रसो द्विविधः, प्राकृतोऽप्राकृतश्च। प्राकृतालम्बनत्वात् प्राकृतः काव्यरसः। अप्राकृतभगवदालम्बनत्वाच्चाप्राकृतो दिव्यरसः "रसो वै सः" इत्यादिश्रुत्या संलक्ष्यमाणः। एतद्व्यतिरिक्तः कोऽयं लौकिको रसः? भ्रमप्रमादविप्रलिप्सा-भीतिचाञ्चल्यरागद्वेषादिपूर्णेन्द्रियविषयास्वाद एवाभिमतश्चेत् लौकिकरसपदेन, तर्हि विलुप्ता रसशास्त्रीयमर्यादा विनष्टा रसविवेचनसम्बन्ध्युच्चस्तरीयसोपानपरम्परा। सिन्धोर्बिन्दुरिवानन्दविवर्तभूतेषु क्षुद्रलौकिकविषयेषु जायता-

मांशिकी आनन्दाभिव्यक्तिः। नैतावता सा रसपदवीमधिरोढुं क्षमा। उत्कर्षापकर्षमात्रेण वस्तुभेदः सम्यगेव। न च काव्यरसस्योत्कर्षाधायकत्वे तेनैव तृप्तिसंभवे लौकिकरसे सामाजिकप्रवृत्तेरभाव इति शंक्यम्? विषमस्थले सर्वसाधारणविषयत्वात्। सन्ति कियन्तः काव्यरसस्पृहयालवः? तत्रापि कतिपये काव्यभावनाभावितात्मानः? अत एवोक्तम्--

पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्।

सत्त्वोद्रेक आयाससाध्यः! रजस्तमसी तु स्वभावसिद्धे। एवं स्थिते कथं विरज्येत लोको लौकिकविषयास्वादात्।

"न हि वीतरागो विपर्यस्तान् भावान् पश्यति, नह्यस्य वीणाक्वणितं काकरटित-कल्पं प्रतिभाति" इत्यानन्दोक्त्या विषयान् प्रति लोकसाधारण्यमिति प्रतिपादनमप्यसाम्प्रतम्। वीतरागेति अन्वर्थनामा रागद्वेषाद्यसम्पृक्तोऽनासक्त्या भुंक्ते सर्वेन्द्रियविषयान्, न च तल्लीनः। सरागस्तु पुनरासक्त्या तल्लीनश्चेति न सार्वजनीनं विषयसाधारण्यम्। "सर्वेषां रसानां शान्तप्राय एवास्वादः" इत्यभिनवभारत्युक्तिं पुरस्कृत्य सर्वरसानां शान्तप्राय एवास्वाद इत्यपि नालम्बते मनोग्राहिताम्। यतोहि--

स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।
पुनर्निमित्तापाये तु शान्त एव प्रलीयते॥

इत्यभिनवोक्तिद्वारा समेषां रसानामुत्पत्तिलयस्थानं शान्तम्। शान्तेऽन्तर्मनसि रसोद्रेकः, पर्यवसाने च पुनरसावेत्रस्थितिरिति आस्वादनकाले सर्वेषां रसानां पृथक् पृथगेव स्वकीयो भोगः। अतएव विभिन्नविभावादिकमुपपन्नं सर्वरसानाम् अन्यथा वैभिन्नचं तेषां व्यर्थमेव स्यात्। अतएव विकासविस्तरक्षोभविक्षेपरूपा विभिन्नाश्चित्तभूमिकाः शृङ्गारवीरबीभत्सरौद्रेषु चतुरस्रतां बिभ्रति। तथ्यमप्येतत्--विषमतामूल जगत्। सत्त्वरजस्तमांस्यनुस्यूतानि सर्वत्र। कथं तर्हि चित्तवृत्तिरैक्यरूप्यमियात्। प्रतिक्षणं भिद्यमानाश्चित्तवृत्तयस्तत्प्रयुक्तो रसास्वादोऽपि सुतरामेव भिन्न इति युक्ततरं काव्यरसस्य महनीयत्वमुपादेयत्वञ्च लोकवृत्तेभ्यस्तदास्वादेभ्यश्च।

स चायं रसः काव्यसंस्कारवासितानां विभावादियोजनपटीयसां सहृदयसामाजिकानामेव जायते न तु अनुकार्ये तत्प्रत्ययस्तन्निष्ठरत्यादेर्लौकिकत्वाद्युपाद्युपहितत्वेन रसपदवीमनालिङ्गनात्। नाप्यनुकर्तरि रसोद्बोधः परचितानुरंजनपरायणस्य तस्य रसानुभूत्यवसरानुपलब्धेः। न चैवं सरसं काव्यमिति व्यवहारः कथमिति चेत्--उत्थापकतासम्बन्धेन तस्य तत्र वर्तनात्। सूक्ष्मातीतादिवस्तूनां सर्वेषामपि शब्दप्रतिपाद्यताया विद्यमानत्वात् तेषां काव्यविषयत्वं वज्रलेपायितम्।

न च रसस्य काव्यनिष्ठत्वे तस्यानुकार्यनिष्ठत्वमपि स्यात्, काव्यार्थात्मनां रामादीनामिदानीमपि विद्यमानत्वादिति चेदत्रोच्यते--रामादयः काव्यार्था इतीदानीन्तनसत्ता तेषामिति रिक्तं वचः, सूक्ष्मातीताद्यर्थानामपि काव्यार्थतया प्रतिपादनात्। न चातीतं प्रत्यक्षविषय इदमभिलपितुं योग्यम्। न चातीत एव स्याद् रसः, तस्य पारमित्यादिहेतुना पूर्वमेव निराकरणात्। न चोत्थापकतया तत्र रसः, तस्य काथञ्चित्कत्वेऽपि तेषां रसाधिष्ठानत्वस्य खपुष्पायितत्वात्।

एवञ्च काव्यनाट्यश्रवणदर्शनानन्तरं तद्वृत्तिव्यंजनया रसोऽभिव्यज्यते। काव्यञ्च शब्दार्थोभयात्मकम्। तयोरन्योन्याश्रितत्वेऽपि शब्दायत्तैवार्थोपस्थितिरिति काव्ये शब्दस्यैवोज्जृम्भणम्। शब्दार्थयोः ज्ञानात्मकत्वप्रतिपादनन्तु प्रमादमात्रम्। "अत्यन्तासत्यपि चार्थे ज्ञानं शब्दः करोति वै" इत्यभियुक्तोक्त्या प्रत्यक्षादिवत् प्रमाणकोटिमाटीकमानस्य तस्य ज्ञानजनकत्वात्। स चायं शब्दः सर्वत्रानुस्यूतोऽर्थक्रियासु समीहयति देहिनः। अयमेव नियामको लौकिकेतिकर्त्तव्यतायाः। अतो विचारात्मकानि निखिलजागतिकानि वस्तूनि वाचः परिधानं धृत्वैव लोकलोचनगोचरतामुपयान्ति। अतोऽस्ति तत्र काप्यनिर्वचनीया शक्तिः। तदुक्तम्--

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धिनी।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते॥
इतिकर्त्तव्यतालोके सर्वाः शब्दव्यपाश्रयाः।
यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते॥ वाक्यपदीयम्।

एतेन शब्द एको जडः पदार्थस्तत्र च न काचित् शक्तिरित्यादिसर्वं खल्वस्थाने कंठघोषः। तस्मादभिधालक्षणे इव व्यंजनापि शब्दव्यापारः। न केवलं शब्दे एवास्याः साम्राज्यमपितु प्रकृतिप्रत्ययतदेकदेशार्थचेष्टादयोऽप्यदसीयमेव क्षेत्रम्। अनयैवाभिव्यज्यते काव्यरस इति सुस्थिरं तस्य शाब्दत्वम्। तदनुभवप्रकारो वाचामगोचरः। नैतावता तस्य शाब्दत्वं वार्यते। अन्यत् खलु शब्दाख्येयत्वमन्यच्च शब्दाभिव्यङ्ग्यत्वमित्यलमतिप्रसक्त्या।

उदयपुर-विश्वविद्यालयीय-संस्कृतगोष्ठी

उदयपुरविश्वविद्यालयस्य संस्कृतविभागो विश्वविद्यालयानुदानायोगस्यार्थिकेन साहाय्येन १९६८ खोष्टाब्दस्य दिसम्बरमासस्य २६, २७, २८ दिवसेषु 'संस्कृते साहित्यसमीक्षासिद्धान्ता' इति विषयमधिकृत्यैकां त्रिदिवसीयां संस्कृतविदुषां विचारपरिषदमायोजयत। तत्र तत्तद्विश्वविद्यालयीयाः प्रायेण पंचविंशतिविद्वांसः समवेताः। उद्घाटनसमारोहे तेभ्यः स्वागतपदमुदीरयता आतिथेयविश्वविद्यालयसंस्कृतविभागाध्यक्षेण डा० रामचन्द्रद्विवेदिना संस्कृतविद्वांसः संस्कृतस्याधुनातनस्यापि साहित्यस्य मूल्यांकनं प्रति सक्रियतामर्जितुमाकारिताः। तत्रैव स्वकीय उद्घाटनभाषणे पूर्वोक्तविश्वविद्यालयस्योपकुलपतिः डा० महाजनिः प्राच्यपाश्चात्ययोः समीक्षासिद्धान्तयोः साम्यवैषम्यं पर्यालोचयन् विदुषां दृष्टिं प्रश्नमिमं प्रति समाकृष्टवान् यत् के नु सिद्धान्ता निरपेक्षाः, सार्वभौमाः सार्वकालिकाश्च भवन्ति, के च तद्विपरीताः। उद्घाटनसमारोहस्याध्यक्ष्यमग्रहीष्ट देशस्यास्य सौन्दर्यशास्त्रविषयस्य आप्ततमो विद्वान् डा० कान्तिचन्द्रपाण्डेयः। विदुषानेन संस्कृतसमीक्षासिद्धान्तानां स्वरूपविकासयोर्दिक् दर्शिता।

प्राध्यापकप्रवराणां श्रीपुरुषोत्तमलालभार्गव–रामसुरेशत्रिपाठी-अ. न. जानि. आद्याप्रसादमिश्र-महोदयानां प्रत्युपवेशनं–क्रमेणाध्यक्ष्ये सम्पन्नायां त्रिदिवसीयायामस्यां परिषदि संस्कृतसमीक्षाशास्त्रस्य प्रायेण सर्व एव सिद्धान्ता व्यमृश्यन्त किन्तु रसध्वनिसिद्धान्ता एव यदृच्छया प्राधान्यमलभन्त। तत्र—

डा० ब्रह्मानन्द शर्मणोऽलङ्कारविवेचनम्, डा० रेवाप्रसादद्विवेदिनः संस्कृतकाव्यशास्त्रे सौन्दर्यबोधोपयोगितत्त्वानि, श्री सुरजनदासस्य रससिद्धान्तस्य विशुद्धं स्वरूपम् डा० रामचन्द्रद्विवेदिनः काव्यशास्त्रसिद्धान्तानां दार्शनिकाधाराः, डा० विश्वनाथभट्टाचार्यस्य काव्यशास्त्रसिद्धान्तानां विकासः, डा० रामसुरेशत्रिपाठिनः चारुत्वप्रतीतिः काव्यस्यात्मा, डा० आद्याप्रसादमिश्रस्य रीतिवृत्तीनां ध्वनिव्यतिरेकिणी स्थितिः, डा० पुरुषोत्तमभार्गवस्य प्राच्यपाश्चात्यनाट्यसिद्धांतानां साम्यवैषम्यमित्यादयो लेखाः पठिता विवेचिताश्च विद्वद्भिः।

विचारगोष्ठ्यामस्यां राजस्थानलोकसेवायोगाध्यक्षादिपदान्यलंकृतवान्, सांप्रतं च लब्धसेवानिवृत्तिः जयपुरीयः श्रीलक्ष्मीलालजोशी कण्ठस्थीकृतसहस्रा-

धिकसंस्कृतपद्यतया संस्कृतानुरागितया चोपसंहारोपवेशनमात्राध्यक्षतया आमंत्रि-तोपि प्रथमोपवेशनात् प्रभृत्येवात्यन्तं मनोयोगेन विचारचर्यासु सोत्साहं निर्व्यभिचारं चोपस्थितः। आतिथेयविश्वविद्यालयस्य कुलपतिः डा० महाजनिः, तस्यैव विश्वविद्यालयस्य प्रमुखतमस्य महाराणा – भूपालमहाविद्यालय-नाम्नो महाविद्यालयस्य संचालकः श्रीमान् भीमसेनश्च बहुषूपवेशनेषु स्वयमुपस्थाय विचारांश्च प्रकटय्य स्वकीयां संस्कृतरुचिं दर्शितवन्तौ। विश्वविद्यालयस्यास्य संस्कृत-तदितर-विषय-विभागीयाः सच्छात्राः ससेवकाश्च प्राध्यापका अपि साक्षात् सोत्साहं चोपस्थाप्य शिक्षासंस्थानस्यास्य 'एककुल'त्वं सत्यापयामासुः।

संस्कृतमाध्यमेन संपन्नानत्यन्तं प्रवाहपूर्णान् वाद–विचारान् निशम्य संस्कृतेतरक्षेत्रीया अनेके संस्कृतस्य सजीवतामभिव्यक्तिक्षमतां च मुक्तकण्ठतया प्रशशंसुः, प्रसन्नात्मानश्च बभूवुः।

आतथेयानामात्मीयतया हृतहृदया अतिथयोपि परिषदमिमामात्मन एवोप-कर्त्रीममंसत। 'देशाटनं पण्डितमित्रता चे'–ति द्वितयमपि तत्र यादृच्छिकीं सिद्धिमलभन्त यदा सातिथेया अतिथयो महाराणाविरुदभाजोः श्रीमदुदयसिंह–प्रतापसिंहयोरैतिहासिकीमिमां कर्मभूमिम्, अस्या निर्निमेपलोचनपुटैकनिपेयां प्रकृति-सुषमां च सप्रहर्षं सोल्लासं च श्रद्धातिरेकेणावलोकयितुमलभभूवन्। सोयं त्रिदिवसीयो ज्ञानयागो देशभक्तियोगतया, भावैक्यसंपादनफलकतीर्थयात्रा-संयोगतया च पर्यणंसीत्। न चायं यागो जातुचिदपि समवेतविदुषां मानससदनाद् वहिर्यास्यतीति मे मतिर्भवति।

अनुसन्धान-प्रसिद्धिः

(१६६८-१६६६ वर्षे)

फरवरीमासस्से सागरविश्वविद्यालयस्य समावर्तनमहोत्सवे निम्नलिखित-विषयानधिकृत्य शोधच्छात्राः पी-एच्. डी. उपाधिविभूषिता अभवन्—

(१) ऊनविंशशताब्द्यां रूपकसाहित्यस्य विकासः–श्री शंकरलाल स्वर्णकारः

(२) स्वतन्त्र्योत्तरेकाले संस्कृतसाहित्यस्य विकासः–श्रीमती निर्मला उपाध्याया

(३) महाभारतीयः शिष्टाचारः–श्रीमती प्रेमलतापचोली

(४) ऋग्वेदस्य द्वितीय मण्डलस्य व्याख्यानुसन्धानम्–श्री सिद्धनाथशुक्लः।

रजिस्टर्ड संख्या १३०४३।६७

सागर-विश्वविद्यालय-मुद्रणालये मुद्रितः